अथ श्रीशुक्लयजुर्वेदीय ब्रह्म (नित्य) कर्म

101

अर्पणपत्रिका

अर्पितम्

इदंपुस्तकम्

कर्ममार्गाभिलाषिभ्योविप्रवर्येभ्यः

विनयपुरःसरानेकप्रणतिभिः

अत्यंतप्रेम्णा

प्रसिद्धकर्त्रा.

अथविषयानुक्रमणिका

॥ प्रस्ताविकाविज्ञप्तिः ॥

॥ श्रीगणाधिपोजयति ॥ वंदेगजाननमहंसुखकारणंचवंदेरमापतिमहंक्कमहारणंच ।
वंदेसदाशिवमहंभवतारणंचवंदेद्विजानपिसदासुविचारयुक्तान् ॥

पुराकिलास्यांभारतभूम्यांशास्त्रनिपुणाःश्रुतिस्मृत्युदितनित्यकर्मानुष्ठानपराब्राह्मणक्षत्रियादयोबहुशआसन् । अधुनातुस्वयंब्राह्मणाअपिशास्त्राध्ययनरहिताःश्रुतिस्मृत्युदितकर्मविमुखावेदमातरंगायत्रीमपिकेचिदजानंतश्चकालमाहात्म्याद्यवनादिसंसर्गाच्च । कुतउतक्षत्रियादयःकर्मानुष्ठानरतादृश्येरन् । अतःश्रुतिस्मृत्युदितंनित्यकर्मविभाततारकंवर्तते । एतादृशेऽपिसमये केचित्कर्मानुष्ठानाभिलाषिणः । तेतुशुद्धसाधनाभावाद्दोषयुक्तकर्माचरणाद्विमुखत्वंवरमितिमत्वाकर्मविमुखाः । केचित्तुरुच्यभावात्ताननुसरन्ति । अतःसशोकंमेहृदयं । कर्माकरणेमहान्दो

षःस्यादितिस्मृत्यादिधर्मशास्त्रग्रंथेषुकथितत्वाल्लोकप्रसिद्धत्वाच्चनात्रप्रमाणानिदत्तानिविस्तरभयात् । केचिच्छ्रुत्युदितंसंध्यावंदनादिकंकर्मयथाशक्त्याचरंति । किंतुशुद्धसामग्र्यभावाद्दोषयुक्तमेव । अधुनासंध्यावंदनादिविषयेबहूनिपुस्तकानिप्रकटीकृतानिवर्तन्ते । किंतुनतानिसर्वावश्यकविषययुक्तानिस्वरादिरहितानिवर्णादिदोषयुक्तानिच । मूर्तिमतावेदेनेवपुरंदरोपाव्हविठ्ठलात्मजेनवैद्यनारायणशर्मणानिर्णयसिंधुधर्मसिंधुश्रौत्रस्मार्तोल्लासाचारमयूखार्कान्हिकप्रकाशादीनिकात्यायनपारस्करगृह्यसूत्राणियाज्ञवल्क्याशिक्षासूत्राणियजुःसंहिताब्राह्मणादीनिचैतेभ्यआधारभूतवचनानिसमुद्धृत्यसर्वत्रदत्वाबालबोधार्थंटिप्पण्यादिकमपिदत्वापूर्णसाधनयुक्तमान्हिकसूत्रावलिनामापूर्वंपुस्तकंमहताप्रयासेनसंशोध्यप्रकटीकृतंतत्तुशुक्लयजुर्माध्यंदिनवाजसनेयशाखिब्राह्मणवृंदोपरिमहानुपकारःकृतः । किंतुग्रंथविस्तारान्मूल्यबाहुल्येनचतत्सर्वैरुपभोग्यं

न । “अवक्षरंहनायुष्यंविस्वरंव्याधिपीडितं” इतिपाणिनीयशिक्षायामुक्तत्वाद्दोषयुक्तकर्मणाहानिःस्यादितिनिश्चित्यात्रस्थैःकैश्चिद्गृहस्थवर्यैःपूर्वंमंदमत्यामयावश्यकविषयान्विद्वज्जनविरचितकतिपयग्रंथेभ्योदर्भावती (डभोई) स्थगुरुवर्यस्यमराठेइत्युपपदधारिणोभिकमभट्टशर्मणःसाहाय्येनसमुद्धृत्यसंशोधितंकाशीरामशर्मणाचप्रकटीकृतंश्रीऋग्वेदाश्वलायनब्रह्म–(नित्य) कर्माभिधंपुस्तकंदृष्ट्वैतादृशंदोषरहितावश्यकविषययुक्तंमूल्याल्पत्वेनचसर्वैःसाध्यंश्रीशुक्लयजुर्वेदीयब्रह्म– (नित्य) कर्माभिधंपुस्तकंप्रकटीकर्तुंप्रेरितःसंस्तत्संशोध्यप्रसिद्धिंनेतुंनिश्चितवान् । किंतुनाहंतच्छाखाध्यायी । नाप्यावश्यकसाहाय्यमत्र । तदपिप्रांशुलभ्येफलेमोहाद्गृहीतुकाम ‘ उद्बाहुर्वामन ’ इवारब्धवान्मंदबुद्धिरहंनर्मदातीरनिवासिनोघनांतकृताध्ययनस्यशुक्लयजुशाखिनस्तुलाशंकरात्मजदौलतरामशर्मणोविप्रवर्यस्यसाहाय्येनेष्टदेवताप्रसादेनचान्हिकसूत्राव

लेरन्येभ्योऽपिग्रंथेभ्यश्चावश्यकविषयान्तसमुद्धृत्ययथामत्यासंशोध्यप्रकाशितवान् । ऋग्वेदस्याश्वलायनशाकलशाखाध्याय्यहं ।तन्मेशुक्लयजुर्माध्यंदिनवाजसनेयशाखान्हिककर्मणिनात्यंतप्रवेशः।किंतु 'मणौवज्रसमुत्कीर्णेसूत्रस्येवास्तिमेगतिः' प्रथमप्रयासश्च।अतः "प्रेम्णासद्भिर्ग्रंथःसेव्यः शब्दार्थतःसदोषोऽपि । संशोध्यवापिहरिणासुदाममुनिसतुषपृथुकमुष्टिरिव " इतिन्यायेनयद्यस्मिन्कथितानिकर्माणिशुद्धाशुद्धंसतुषपृथुकमिवसाक्षाद्धरिसदृशब्राह्मणाः संशोध्यहृष्टमानसाआचरेयुःकृतार्थोऽहंभवेयंतथैवात्रस्थागृहस्थवर्याःप्रेरकाश्च । अस्मिन्प्रथमप्रयासेभ्रमात्स्खलितंचेद्गच्छतःस्खलनंनदोषायेतिन्यायेनपरगुणपरमाणून्पर्वतीकुर्वन्तोविद्वांसःक्षंतुंपत्रद्वाराप्रकाशयितुंचार्हंतियतोद्वितीयावृत्तिसमयेतद्दोषंदूरीकर्तुंसुकरंभवेदितिविज्ञापयामिविनयपुरःसरानेकप्रणतिभिः

वसुंधरा (वसो) शाके १८१२ आश्विन शुक्ल १० गुरौ	वसुंधराङ्गलगुर्जरशालामुख्याध्यक्षोद्विजवर्गसेवको जोश्युपाव्हप्रेमानंदात्मजजयशंकरशर्माऽहम् ॥

॥ श्रीगणाधिपोजयति ॥ **अथशुक्लयजुर्वेदीयब्रह्म-(नित्य)कर्मप्रारभ्यते** ॥ तदादौमंगलाचरणम् ॥ वेदांतेषुयमाहुरेकपुरुषंव्याप्यस्थितंरोदसीयस्मिन्नीश्वरइत्यनन्यविषयःशब्दोयथार्थाक्षरः॥ अंतर्यश्चमुमुक्षुभिर्नियमितप्राणादिभिर्मृग्यतेसाफल्यायसदास्तुमेपुररिपुःश्रीपार्वतीवल्लभः॥इति मंगलाचरणम् ॥ ॥ ॥ **अथप्रातःस्मरणम्** ॥ ॥ श्रीगणेशायनमः ॥ ब्राह्मेमुहूर्तेयानिद्रासापुण्यक्षयकारणी । तांकरोतिद्विजोमोहात्पादकृच्छ्रेणशुध्यति॥ इतिप्रत्यवायकथित्वात् ॥ ब्राह्मेमुहूर्तेउत्थायगंडूषत्रितयंचरेत् । आचम्यनेत्रेप्रक्षाल्यधर्मार्थावनुचिंतयेत् । कायक्लेशांश्चतन्मूलान्वेदतत्त्वार्थमेवच ॥ तद्यथा ॥ यस्यमाताउमादेवीपितायस्यतुशंकरः । मूषकोवाहनंयस्यसमांपातुविनायकः ॥ १ ॥ प्रातःस्मरामिभवभीतिमहार्तिशांत्यैनारायणंगरुडवाहनमब्जनाभम् । ग्राहाभिभूतवरवारणमुक्तिहेतुंचक्रायुधंतरुणवारिजपत्रनेत्रम् ॥ १ ॥ प्रातर्नमामिमनसावचसा

य०ब्र० चमूर्ध्नोपादारविंदयुगुलंपरमस्यपुंसः । नारायणस्यनरकार्णवतारणस्यपारायणप्रणत्रविप्रपराय कर्म
॥ १ ॥ णस्य ॥ २ ॥ प्रातर्भजामिभजतामभयंकरंतंप्राक्सर्वजन्मकृतपापभयापहत्यै । योग्राहवक्त्रपति
तांघ्रिगजेंद्रघोरशोकप्रणाशनकरोधृतशंखचक्रः ॥ ३ ॥ श्लोकत्रयमिदंपुण्यंप्रातःप्रातःपठेन्नरः ।
लोकत्रयगुरुस्तस्मैदद्यादात्मपदंहरिः ॥ ४ ॥ प्रातःस्मरामिगणनाथमनाथबंधुंसिंदूरपूर्णपरिशोभि
तगंडयुग्मम् । उद्दंडविघ्नपरिखंडनचंडदंडमाखंडलादिसुरनायकवृंदवंद्यम् ॥ १ ॥ प्रातर्नमामिचतु
राननवंद्यमानमिच्छानुकूलमखिलंचवरंददानम् । तंतुंदिलंद्विरसनाधिपयज्ञसूत्रंपुत्रंविलासचतुरं
शिवयोःशिवाय ॥ २ ॥ प्रातर्भजाम्यभयदंखलुभक्तशोकदावानलंगजविभुंवरकुंजरास्यम् । अ ॥ १ ॥
ज्ञानकाननविनाशनहव्यवाहमुत्साहवर्धनमहंसुतमीश्वरस्य ॥ ३ ॥ श्लोकत्रयमिदंपुण्यंसदा
साम्राज्यदायकम् । प्रातरुत्थायसततंयःपठेत्प्रयतःपुमान् ॥ ४ ॥ प्रातःस्मरामिखलुतत्सवितु

र्वरेण्यंरूपंहिमंडलमृचोथतनुर्यजूंषि । सामानियस्यकिरणाःप्रभवादिहेतुंब्रह्माहरात्मकमलक्ष्यम
चिंत्यरूपम् ॥ १ ॥ प्रातर्नमामितरणिंतनुवाङ्मनोभिर्ब्रह्मेंद्रपूर्वकसुरैर्नुतमर्चितंच । वृष्टिप्र
मोचनविनिग्रहहेतुभूतंत्रैलोक्यपालनपरंत्रिगुणात्मकंच ॥ २ ॥ प्रातर्भजामिसवितारमनंत
शक्तिंपापौघशत्रुभयरोगहरंपरंच । तंसर्वलोककलनात्मककालमूर्तिंगोकंठबंधनविमोचनमादिदे
वम् ॥ ३ ॥ श्लोकत्रयमिदंभानोःप्रातःप्रातःपठेत्तुयः । ससर्वव्याधिनिर्मुक्तःपरंसुखमवाप्नुया
त् ॥ ४ ॥ प्रातःस्मरामिशरदिंदुकरोज्ज्वलाभांसद्रत्नवन्मकरकुंडलहारभूषाम् । दिव्यायु
धोर्जितसुनीलसहस्रहस्तांरक्तोत्पलाभचरणांभजतींपरेशाम् ॥ १ ॥ प्रातर्नमामिमहिषासुरचंड
मुंडशुंभासुरप्रमुखदैत्यविनाशदक्षाम् । ब्रह्मेंद्ररुद्रमुनिमोहनशीललोलांचंडींसमस्तसुरमूर्तिमनेक
रूपाम् ॥ २ ॥ प्रातर्भजामिभजतामभिलाषदात्रींधात्रींसमस्तजगतांदुरितापहंत्रीम् । संसारबं

 वनविमोचनहेतुभूतांमायांपरांसमधिगम्यपरस्यविष्णोः ॥ ३ ॥ श्लोकत्रयमिदंदेव्याश्चंडिकायाः
 पठेन्नरः । सर्वान्कामानवाप्नोतिविष्णुलोकेमहीयते ॥ ४ ॥ प्रातःस्मरामिभवभीतिहरंसुरेशंगंगाधरं
वृषभवाहनमंबिकेशम् । खट्वांगशूलवरदाभयहस्तमीशंसंसाररोगहरमौषधमद्वितीयम् ॥ १ ॥
प्रातर्नमामिगिरिशंगिरिजार्धदेहंसर्गस्थितिप्रलयकारणमादिदेवम् । विश्वेश्वरंविजितविश्वमनोभि
रामंसंसाररोग० ॥ २ ॥ प्रातर्भजामिशिवमेकमनंतमाद्यंवेदांतवेद्यमनघंपुरुषंमहांतम् । नामादि
भेदरहितंषडभावशून्यंसंसार० ॥ ३ ॥ प्रातःसमुत्थायशिवंविचिंत्यश्लोकत्रयंयेऽनुदिनंपठंति ।
तेदुःखजालंबहुजन्मसंचितंहित्वापदंयांतितदेवशंभोः ॥ ४ ॥ प्रातःस्मरामिहृदिसंस्फुरदात्मत
त्त्वंसच्चित्सुखंपरमहंसगतिंतुरीयम् । यत्स्वप्नजागरसुषुप्तमवैतिनित्यंतद्ब्रह्मनिष्कलमहंनचभूतसं
घः ॥ १ ॥ प्रातर्भजामिमनसोवचसामगम्यंवाचोविभांतिनिखिलायदनुग्रहेण । यन्नेतिनेति
वचनैर्निगमाअवोचंस्तंदेवदेवमजमच्युतमाहुरग्र्यम् ॥ २ ॥ प्रातर्नमामितमसःपरमर्कवर्णंपूर्णं
सनातनपदंपुरुषोत्तमाख्यं । यस्मिन्निदंजगदशेषमशेषमूर्तौरज्ज्वांभुजंगमइवप्रतिभासितंवै ॥ ३ ॥
श्लोकत्रयमिदंपुण्यंलोकत्रयविभूषणं । प्रातःकालेपठेद्यस्तुसगच्छेत्परमंपदम् ॥ ४ ॥ ब्रह्मामुरा
रिस्त्रिपुरांतकारीभानुःशशीभूमिसुतोबुधश्च । गुरुश्चशुक्रःशनिराहुकेतवःकुर्वंतुसर्वेममसुप्रभातम्
॥ अथप्रातःस्मरणसूक्तम् ॥ हरिः ॐ ॥ प्रातरग्निम्प्रातरिन्द्रंꣳहवामहेप्रातर्मित्रावरुणाप्रातर
श्विनां ॥ प्रातर्भगम्पूषणम्ब्रह्मंणस्पतिम्प्रातःसोमंमुतरुद्रꣳहुवेम ॥ १ ॥ प्रातर्जितम्भगंमुग्रꣳहुं
वेमवयम्पुत्रमदितेर्योविधर्ता । आध्रश्चिद्यम्मन्यमानस्तुरश्चिद्राजाचिद्यम्भगम्भक्षीत्याह ॥ २ ॥
भगप्रणेतर्भगसत्यराधोभगेमान्धियमुदवाददन्नः । भगप्रनोजनयगोभिरश्वैर्भगप्रनृभिर्नृवन्तः
स्याम ॥ ३ ॥ उतेदानीम्भगवन्तःस्यामोतप्रपित्वऽउतमध्येऽअन्हाम् । उतोदितामघवन्त्सूर्य

स्यवयन्देवानां॑ᳯसुमतौस्याम ॥ ४ ॥ भगऽएवभगंवा ँऽअस्तुदेवास्तेनंवयम्भगंवन्तᳯस्याम । तन्त्वांभगसर्वऽइज्जोहवीतिसनोभगपुरऽएताभंवेह ॥ ५ ॥ समंध्वरायोषसोनमन्तदधिक्रावेव शुचंयेपदाय । अर्वाचीनंवसुविदम्भगंन्नोरथंमिवाश्वांवाजिनऽआवंहन्तु ॥ ६ ॥ अश्वांवतीर्गोमं तीर्नऽउषासोवीरवंतीᳯसदंमुच्छन्तुभद्राः । घृतन्दुहांनाविश्वतᳯप्रपींतायूयम्पांतस्वस्तिभिᳯसदां नᳯ ॥ ७ ॥ **इतिप्रातःस्मरणसूक्तम्** ॥ कराग्रेवसतेलक्ष्मीःकरमूलेसरस्वती । करमध्येतुगो विंदःप्रभातेकरदर्शनम् ॥ इतिस्वस्वेष्टदेवतांग्रहांश्चप्रार्थ्यप्रातःस्मरणसूक्तंपठित्वाकरदर्शनंचकृ त्वारविंगुरुंचनमस्कुर्यात् ॥ ततोदिवाचेदुदङ्मुखोरात्रौचेद्दक्षिणामुखोमूत्रपुरीषोत्सर्गादिशौचवि धिंविधायमुक्तशिखःप्राङ्मुखोमौन्यौदुंबराद्युक्तकाष्ठेनद्वादशांगुलदैर्घ्येणकनिष्ठिकाग्रवत्स्थूलेनार्ध पर्वप्रमाणकृतकूर्चेणदंतमांसमबाधयन्दंतान्संशोध्यजिह्वोल्लेखंकृत्वास्ववामभागेद्वादशगंडूषांश्चकृ ॥ ३ ॥

त्वोंकारंगायत्रींचस्मृत्वाशिखांबध्नीयात् ॥ ततः"अपवित्रःपवित्रोवासर्वावस्थांगतोपिवा । यः स्मरेत्पुंडरीकाक्षंसबाह्याभ्यन्तरःशुचिः"इतिमंत्रेणाद्भिःस्वशरीरंमार्जयेद्रविंतुलसींगांचनमस्कुर्या द्वक्ष्यमाणमंत्रैः ॥ आदित्यस्यनमस्कारंयेकुर्वंतिदिनेदिने । जन्मांतरसहस्त्रेषुद्रारिद्र्यंनोपजा यते ॥ इत्यादित्यं ॥ महाप्रसादजननीसर्वसौभाग्यवर्धिनी । आधिव्याधिहरानित्यं तुलसीत्वांनमोस्तुते ॥ इतितुलसीं ॥ गावोमेअग्रतःसंतुगावोमेसंतुपृष्ठतः । गावोमेहृदयेसंतुग वांमध्येवसाम्यहम् ॥ इतिगां ॥ **इतिप्रातःस्मरणम्** ॥ २ ॥ **अथगृहस्नानविधिः** ॥ श्रीगणेशायनमः॥ पात्रेकिंचिच्छीतोदकंप्रक्षिप्यतदुपर्युष्णोदकेनपात्रमापूर्यतदुपरियथेष्टंशीतोदकं प्रक्षिपेत् ॥ आचम्य ॥ अंजलावुदकंगृहीत्वास्नानसंकल्पंकुर्यात् ॥ अद्यपूर्वोच्चरित॰एवंग्रहगुण विशेषणविशिष्टायांशुभपुण्यतिथौममात्मनःश्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थंकायिकवाचिकमान

सिकसांसर्गिकज्ञाताज्ञातस्पर्शास्पर्शासनभोजनशयनगमनकृतकर्मदोषनिरसनद्वाराश्रीपरमेश्वर प्रीत्यर्थंस्नानमहंकरिष्ये ॥ इतिसंकल्प्य ॥ ॐ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये । शंय्योरभिस्त्रवन्तुनः ॥ १ ॥ ॐ आपःपुनन्तुपृथिवींपृथिवीपूतापुनातुमाम् । पुनन्तुब्रह्मणस्पतिर्ब्रह्मपूतापुनातुमाम् ॥ २ ॥ ॐ द्रुपदादिवमुमुचानःस्विन्नःस्नातोमलादिव । पूतम्पवित्रेणेवाज्यमापःशुन्धन्तुमैनसः ॥३॥ ॐ ऋतंचसत्यंचाभीद्धात्तपसोध्यजायत । ततोरात्र्यजायततततःसमुद्रोअर्णवः ॥४॥ ॐ आपोहिष्ठामयोभुवस्तानऽऊर्जेदधातन । महेरणायचक्षसे ॥ ५ ॥ इतिपंचमंत्रैरुदकमभिमंत्र्य । गंगादितीर्थानिस्मरेत् ॥ गंगेचयमुनेचैवगोदावरिसरस्वति । नर्मदेसिंधुकावेरिजलेऽस्मिन्सन्निधिंकुरु । नंदिनीनलिनीसीतामालतीचमलापहा । विष्णुपादाब्जसंभूतागंगात्रिपथगामिनी । भागीरथीभोगवतीजान्हवीत्रिदशेश्वरी ॥ द्वादशैतानिनामानियत्रयत्रजलाशये । स्नातोद्यतःपठे

द्यत्रतत्रैवनिवसाम्यहम् ॥ इतिस्मरन्स्नात्वाचम्य ॥ ॐ आपोहिष्ठा० ॥१॥ ॐ योवःशिवतमोरसस्तस्यभाजयतेहनः । उशतीरिवमातरः ॥ २ ॥ ॐ तस्माऽअरंगमामवोयस्यक्षयायजिन्वथ । आपोजनयथाचनः ॥ ३ ॥ इतितिसृभिर्मार्जनंकुर्यात् ॥ ततोधौतेवाससीपरिधायशिखाबंधनंकृत्वाशरीरशुध्यर्थंपुरुषसूक्तंजपेत् ॥ इतिगृहस्नानविधिः ॥ ३ ॥ अथतीर्थस्नानविधिः ॥ श्रीगणेशायनमः ॥ शुचिर्भूतःकर्ताशुभ्रांयथादेशसंभवांवामृदमार्द्रगोमयंकुशान्तिलाक्षतान्सुरभीणिपुष्पाणिभस्मचादायतीर्थतटंगच्छेत् ॥ तदनंतरंसूर्याभिमुखस्तीर्थानिप्रार्थयेत् ॥ तद्यथा ॥ नमामिगंगेतवपादपंकजंसुरासुरैर्वंदितदिव्यरूपम् । भुक्तिंचमुक्तिंचददासिनित्यंभावानुसारेणसदानराणाम् ॥यागतिर्योगयुक्तानांमुनीनामूर्ध्वरेतसाम् ।सागतिःसर्वजंतूनांगौतमीतीरवासिनाम् ॥ पुष्कराद्यानितीर्थानिगंगाद्याःसरितस्तथा । आगच्छंतुपवित्राणिस्नानकालेसदाम

य०ब्र० म ॥ त्वंराजासर्वतीर्थानांत्वमेवजगतःपिता । याचितंदेहिमेतीर्थंसर्वपापैःप्रमुच्यते ॥ अपामधिपति कर्म
स्त्वंचतीर्थेषुवसतिस्तव। वरुणायनमस्तुभ्यंस्नानानुज्ञांप्रयच्छमे ॥ अधिष्ठात्र्यश्चतीर्थानांतीर्थेषुवि
॥ ५ ॥ चरंतियाः । देवतास्ताःप्रयच्छंतुस्नानाज्ञांममसर्वदा ॥ गंगेचयमुने० ॥ इतिप्रार्थ्यहस्तौपादौप्र
क्षाल्याचम्य ॥ उदकमंजलौगृहीत्वास्नानसंकल्पंकुर्यात् ॥ अद्यपूर्वोच्चरित० एवंग्रहगुणविशेषे
णविशिष्टायांशुभपुण्यतिथौममात्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थंममेहजन्मनिजन्मांतरेवा
कायिकवाचिकमानसिकसांसर्गिकस्पृष्टास्पृष्टभुक्ताभुक्तपीतापीतादिसकलपातकनिरसनपूर्वकमा
सनभोजनशयनगमनादिष्वनृतभाषणादिदोषनिरसनद्वारा श्रीपरमेश्वरप्रीत्यर्थंममुकतीर्थेस्नान ॥ ५ ॥
महंकरिष्ये ॥ इतिसंकल्य ॥ ॐ उरुꣳहिराजावरुणश्चकारसूर्यायपन्थामन्वेतवाऽउ । अपदेपादा
प्रतिधातवेकरुतापवक्ताहृदयाविधश्चित् । नमोवरुणायाभिष्ठितोवरुणस्यपाशः ॥ १ ॥ इ
तितोयमभिमंत्र्य ॥ ॐ येतेशतंवरुणंयेसहस्रंयज्ञियाःपाशाविततामहान्तः । तेभिर्नोऽअद्य
सवितोतविष्णुर्विश्वेमुञ्चन्तुमरुतःस्वर्काः ॥ इतिजलंदक्षिणावर्तंत्रिवारमावर्तयेत् ॥ ॐ सुमि
त्रियानऽआपऽओषधयःसन्तु ॥ इतिजलांजलिंगृहीत्वा ॥ ॐ दुर्मित्रियास्तस्मैसन्तुयोस्मान्द्वे
ष्टियञ्चवयंद्विष्मः ॥ इतिस्वशत्रून्मनसाविचिंत्यतन्नाशार्थंगृहीतांजलिंतटेस्ववामभागेक्षिपेत् ॥
मृदमादायत्रिभागान्कृत्वाप्रथमभागंवामहस्तेगृहीत्वातेननाभेरधःकटिप्रदेशमनुलेपयेत् ॥ हस्त
प्रक्षाल्य ॥ पुनस्तेनैवद्वितीयभागेनबस्तिमूरूजंघेचरणौकरौचप्रत्येकंतूष्णींत्रिस्त्रिरनुलिप्य ॥
पुनर्हस्तंप्रक्षाल्याचम्य ॥ तीर्थोदकंनमस्तुर्यात् ॥ ॐ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् । समूढ
स्यपांꣳसुरेस्वाहा ॥ इतिमंत्रेणतृतीयभागेनदक्षिहस्तेनललटादिनाभिपर्यंतानिगात्राण्युपलि
प्य ॥ हस्तंप्रक्षाल्याचम्य ॥ तीर्थोदकंनमस्कुर्यात् ॥ अश्वक्रांतेरथक्रांतेविष्णुक्रांतेवसुंधरे । उ

द्धृतासिवराहेणकृष्णेनशतबाहुना ॥ मृत्तिकेब्रह्मपूतासिकाश्यपेनाभिवंदिता । त्वयाहतेनपापेन गच्छामिपरमांगतिम् ॥ मृत्तिकेहरमेपापंयन्मयादुष्कृतंकृतम् ॥ इतिप्रार्थ्य ॥ नाभिमात्रंतीर्थजलंप्रविश्यसूर्याभिमुखःस्नायात् ॥ तत्रमंत्रः ॥ ॐआपोऽअस्मान्मातरंꣳशुन्धयन्तुघृतेननोघृतप्वꣳ पुनन्तु । विश्वꣳहिरिप्रम्प्रवहन्तिदेवीः ॥ इतिनिमज्य ॥ ॐउदिदाभ्यꣳशुचिरापूतऽएमि ॥ इतिद्वितीयवारंनिमज्य ॥ पुनस्तूष्णींनिमज्योन्मज्याचामेत् ॥ गोमयमादाय ॥ अग्रमग्रंचरंतीनामोषधीनांवनेवने । तासांवृषभपत्नीनांपवित्रंकायशोधनम् ॥ इत्यभिमंत्र्य ॥ ॐमानस्तोकेतनयेमानऽआयुषिमानोगोषुमानोऽअश्वेषुरीरिषः । मानोवीरान्रुद्रभामिनोवधीर्हविष्मन्तः सदमित्वाहवामहे ॥ इतिसोदकंगोमयंसूर्यायदर्शयित्वातेनत्रिवारमंगानिललाटादिपादतलपर्यंतान्यनुलिप्य ॥ स्नात्वाचम्य ॥ भस्मआदाय ॥ ॐअग्निरितिभस्म । वायुरितिभस्म । जलमितिभस्म ।

स्थलमितिभस्म । व्योमेतिभस्म । सर्वꣳहवाइदंभस्म । मनऽएतानिचक्षूꣳषिभस्मानि ॥ इत्यभिमंत्र्य ॥ ॐप्रसद्यभस्मनायोनिमपश्चपृथिवीमग्ने । सꣳसृज्यमातृभिष्ट्वञ्ज्योतिष्मान्पुनरासदः ॥ इतिललटाद्यंगेषुभस्मलेपनंकृत्वा ॥ स्नात्वाचम्य ॥ ॐइमम्मेवरुणश्रुधीहवमद्याचमृडय । त्वामवस्युराचके ॥१॥ ॐतत्त्वायामिब्रह्मणावन्दमानस्तदाशास्तेयजमानोहविर्भिः । अहेडमानोवरुणेहबोध्युरुशꣳसमानऽआयुःप्रमोषीः ॥ २ ॥ ॐत्वन्नोऽअग्नेवरुणस्यविद्वान्देवस्यहेडोऽअवयासिसीष्ठाः ॥ यजिष्ठोवन्हितमꣳशोशुचानोविश्वाद्वेषाꣳसिप्रमुमुग्ध्यस्मत् ॥ ३ ॥ ॐसत्वन्नोऽअग्नेवमोभवोतीनेदिष्ठोऽअस्याऽउषसोव्युष्टौ । अवयक्ष्वनोवरुणꣳरराणोवीहिमृडीकꣳसुहवोनऽएधि ॥ ॥ ४ ॥ ॐमापोमौषधीर्हिꣳसीर्धाम्नोधाम्नोराजँस्ततोवरुणनोमुञ्च । यदाहुरघ्न्याऽइतिवरुणेतिशपामहेततोवरुणनोमुञ्च ॥ ५ ॥ ॐउदुत्तमंवरुणपाशमस्मदवाधमंविमध्यमꣳश्रथाय । अ

य०ब्र० थावयमादित्यव्रतेतवानागसोऽअदितयेस्याम ॥ ६ ॥ ॐमुञ्चन्तुमाशपथ्याद्थोवरुण्यादुत । कर्म०
अथोयमस्यपड्वीशात्सर्वस्माद्देवकिल्बिषात् ॥ ७ ॥ अवभृथनिचुम्पुणनिचेरुरसिनिचुम्पुणः ।
॥ ७ ॥ अवदेवैर्देवकृतमेनोयासिषमवमर्त्यैर्मर्त्यकृतम्पुरुराव्णोदेवरिषस्पाहि ॥ ८ ॥ इतिसर्वाङ्गानिमा
र्जयित्वा ॥ तूष्णींस्नात्वाचम्य ॥ ॐआपोहिष्ठा० ॥ १ ॥ ॐयोवःशिवत० ॥ २ ॥ ॐ
तस्माऽअरङ्ग० ॥ ३ ॥ ॐइदमापःप्रवहतावद्यञ्चमलञ्चयत् । यच्चाभिदुद्रोहानृतंयच्चशेपेऽ
अभीरुणम् । आपोमातस्मादेनसःपवमानश्चमुञ्चतु ॥ ४ ॥ ॐहविष्मतीरिमाऽआपोहवि
ष्मा२ँ ॥ ऽआविवासति । हविष्मान्देवोऽअध्वरोहविष्मा२ँ ॥ ऽअस्तुसूर्यः ॥ ५ ॥ ॐदेवीरा
पोऽअपान्नपाद्योवऽऊर्मिर्हविष्यऽइन्द्रियावान्मदिन्तमः । तन्देवेभ्योदेवत्रादत्तशुक्रपेभ्योयेषाम्भा ॥ ७ ॥
गस्थस्वाहा ॥ ६ ॥ ॐकार्षिरसिसमुद्रस्यत्वाक्षित्याऽउन्नयामि । समापोऽअद्भिरग्मतसमोषधी

भिरोषधीः ॥ ७ ॥ ॐअपोदेवामधुमतीरगृभ्णन्नूर्जस्वतीराजस्वश्चितानाः । याभिर्मित्रावरुणा
वभ्यषिञ्चन्याभिरिन्द्रमनयन्नत्यरातीः ॥ ८ ॥ ॐद्रुपदा० ॥ ९ ॥ ॐशन्नोदेवी० ॥ १० ॥ ॐ
अपाꣳरसमुद्वयसꣳसूर्येसन्तꣳसमाहितम् । अपाꣳरसस्ययोरसस्तंवोगृह्णाम्युत्तममुपयामगृहीतो
सीन्द्रायत्वाजुष्टङ्गृह्णाम्येषतेयोनिरिन्द्रायत्वाजुष्टतमम् ॥ ११ ॥ ॐ अपोदेवीरुपसृजमधुम
तीरयक्ष्मायप्रजाभ्यः । तासामास्थानादुज्जिहतामोषधयःसुपिप्पलाः ॥ १२ ॥ ॐ पुनन्तुमापित
रःसोम्यासःपुनन्तुमापितामहाःपुनन्तुप्रपितामहाः । पवित्रेणशतायुषा ॥ १३ ॥ ॐ पुनन्तु
मापितामहाःपुनन्तुप्रपितामहाः । पवित्रेणशतायुषाविश्वमायुर्व्यश्नवै ॥ १४ ॥ ॐ अग्नआयूꣳ
षिपवसऽआसुवोर्जमिषञ्चनः । आरेबाधस्वदुच्छुनाम् ॥ १५ ॥ ॐ पुनन्तुमादेवजनाःपुनन्तुम
नसाधियः । पुनन्तुविश्वाभूतानिजातवेदःपुनीहिमा ॥ १६ ॥ ॐ पवित्रेणपुनीहिमाशुक्रेणदेवदी

य०ब्र० द्यंत् । अग्नेक्रत्वाक्रतूँ॥रनु ॥१७॥ ॐ यत्तेपवित्रंमर्चिष्यग्नेविततमन्तरा । ब्रह्मतेनंपुनातुमा ॥ कर्म.
॥ ८ ॥ ॥१८॥ ॐ पवमानःसोऽअद्यनः पवित्रेणविचर्षणिः । यःपोतासपुनातुमा॥१९॥ॐ उभाभ्यां
न्देवसवितःपवित्रेणसवेनच । माम्पुनीहिविश्वतः ॥ २० ॥ ॐ वैश्वदेवीपुनतीदेव्यागाद्यस्यामि
माबह्व्यस्तन्वोवीतपृष्ठाः । तयामदन्तःसधमाद्येषुवयꣳस्यामपतयोरयीणाम् ॥ २१ ॥ इतिदर्भै
र्मार्जयित्वोदकंस्पृशेत् ॥ ॐ चित्पतिर्मापुनात्वच्छिद्रेणपवित्रेणसूर्यस्यरश्मिभिः । तस्यंतेपवित्रप
तेपवित्रंपूतस्ययत्कामःपुनेतच्छकेयम् ॥ १ ॥ ॐ वाक्पतिर्मापुनात्वच्छिद्रेणपवित्रेणसूर्यस्यरश्मि
भिः । तस्यंते० ॥२॥ॐ देवोमासवितापुनात्वच्छिद्रेणपवित्रेणसूर्यस्यरश्मिभिः।तस्य०॥३॥ॐ
भूःपुनातु॥४॥ॐ भुवःपुनातु॥५॥ॐ स्वःपुनातु ॥६॥ ॐ महःपुनातु॥७॥ॐ जनःपुनातु॥८॥ ॥ ८ ॥
ॐ तपःपुनातु ॥ ९ ॥ ॐ सत्यंपुनातु ॥ १० ॥ ॐ तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि । धियो

योनः प्रचोदयात् ॥ ११ ॥ ॐ इमम्मेइत्यष्टौ ॥ १९ ॥ इतिकुशैर्मार्जयित्वा ॥ ततोंतरजलेमग्नो
नुच्छ्वसन् "ॐ द्रुपदा० ॥" इतित्रिवारंपठित्वाघमर्षणंकुर्यात् ॥ अथस्नानांगतर्पणम् ॥ ॐ ब्र
ह्मादयोदेवास्तृप्यन्ताम्॥ॐ भूर्देवास्तृ०॥भुवर्देवास्तृ०॥ ॐ स्वर्देवास्तृ०॥ ॐ भूर्भुवःस्वर्देवास्तृ
प्यन्ताम् ॥ इतिसव्येनकुशाग्रैर्देवतीर्थेनैकैकमंजलिंदद्यात् ॥ ॐ सनकादिद्वैपायनादयऋषयस्तृ
प्यन्ताम् । ॐ भूर्ऋषयस्तृ० । ॐ भुवर्ऋषयस्तृ० । ॐ स्वर्ऋषयस्तृ० । ॐ भूर्भुवःस्वर्ऋषयस्तृप्य
न्ताम् ॥ इतिनिवीत्याप्राजापत्यतीर्थेनोदगग्राभिर्दर्भैर्द्वौद्वावंजलीदद्यात् ॥ ॐ कव्यवाडनलाद
यःपितरस्तृप्यन्ताम् । ॐ भूःपितरस्तृ० । ॐ भुवःपितरस्तृ० । ॐ स्वःपितरस्तृ० । ॐ भूर्भुवः
स्वःपितरस्तृप्यन्ताम् ॥ इत्यपसव्येनपितृतीर्थेनदक्षिणाग्रमूलैर्दर्भैस्त्रींस्त्रीनंजलीन्दद्यात ॥ तत
आचम्य"यन्मयादूषितंतोयंशारीरमलसंभवात् । तद्दोषपरिहारार्थंयक्ष्माणंतर्पयाम्यहम्"इतिमं

त्रेणतीर्थतटेतिलमिश्रजलांजलिप्रक्षेपेणयक्ष्माणंतर्पयेत् ॥ लतागुल्मेषुवृक्षेषुपितरोयेऽव्यवस्थि
ताः । तेसर्वेतृप्तिमायान्तुमयोत्सृष्टैःशिखोदकैः ॥ इतिस्वदक्षिणभागेशिखाग्रंनिष्पीडयेत् ॥ त
तोधौतेवाससीपरिधायशिखाबंधनंकृत्वाशरीरशुध्यर्थंपुरुषसूक्तंजपेत् ॥ **इतितीर्थस्नानविधिः**
॥ ४ ॥ **अथपुरुषसूक्तम्** ॥ श्रीगणेशायनमः ॥ सहस्रशीर्षेतिषोडशर्चस्यसूक्तस्यनारायण
ऋषिः ॥ पुरुषोदेवता । अनुष्टुप्छंदः । अंत्यात्रिष्टुप् । शरीरशुध्यर्थंपुरुषसूक्तजपेविनियोगः ॥
हरिः ॐ सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात् । सभूमिꣳसर्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥
पुरुषऽएवेदꣳसर्वंयद्भूतंयच्चभाव्यम् । उतामृतत्वस्येशानोयदन्नेनातिरोहति ॥ २ ॥ एतावानस्य
महिमातोज्यायाँश्चपूरुषः । पादोस्यविश्वाभूतानित्रिपादस्यामृतन्दिवि ॥ ३ ॥ त्रिपादूर्ध्वऽउ
दैत्पुरुषःपादोस्येहाभवत्पुनः । ततोविष्वङ्व्यक्रामत्साशनानशनेऽअभि ॥ ४ ॥ ततोविराड
जायतविराजोऽअधिपूरुषः । सजातोऽअत्यरिच्यतपश्चाद्भूमिमथोपुरः ॥ ५ ॥ तस्माद्यज्ञात्स
र्वहुतःसम्भृतम्पृषदाज्यम् । पशूँस्ताँश्चक्रेवायव्यानारण्याग्राम्याश्चये ॥ ६ ॥ तस्माद्यज्ञात्स
र्वहुतऽऋचःसामानिजज्ञिरे । छन्दाꣳसिजज्ञिरेतस्माद्यजुस्तस्मादजायत ॥ ७ ॥ तस्मादश्वा
ऽअजायन्तयेकेचोभयादतः । गावोहजज्ञिरेतस्मात्तस्माज्जाताऽअजावयः ॥ ८ ॥ तंयज्ञम्ब
र्हिषिप्रौक्षन्पुरुषञ्जातमग्रतः । तेनदेवाऽअयजन्तसाध्याऽऋषयश्चये ॥ ९ ॥ यत्पुरुषंव्यदधुः
कतिधाव्यकल्पयन् । मुखङ्किमस्यासीत्किम्बाहूकिमूरूपादाऽउच्येते ॥ १० ॥ ब्राह्मणोस्यमु
खमासीद्बाहूराजन्यःकृतः । ऊरूतदस्ययद्वैश्यःपद्भ्याꣳशूद्रोऽअजायत ॥ ११ ॥ चन्द्रमामन
सोजातश्चक्षोःसूर्योऽअजायत । श्रोत्राद्वायुश्चप्राणश्चमुखादग्निरजायत ॥ १२ ॥ नाभ्याऽआ
सीदन्तरिक्षꣳशीर्ष्णोद्यौःसमवर्तत । पद्भ्याम्भूमिर्दिशःश्रोत्रात्तथालोकाँ२ ॥ ऽअकल्पयन् ॥

॥ १३ ॥ यत्पुरुषेणहविषादेवायज्ञमतन्वत । वसन्तोस्यासीदाज्यङ्ग्रीष्मऽइध्मःशरद्धविः ॥
॥ १४ ॥ सप्तास्यासन्परिधयस्त्रिःसप्तसमिधः कृताः । देवायद्यज्ञन्तन्वानाऽअबध्नन्पुरुषम्प
शुम्॥१५॥यज्ञेनयज्ञमयजन्तदेवास्तानिधर्माणिप्रथमान्यासन् । तेहनाकम्महिमानः सचन्तयत्र
पूर्वेसाध्यासन्तिदेवाः॥१६॥**इतिपुरुषसूक्तम्॥** ॥**अथभस्मरुद्राक्षधारणंशिखाबंधनंच॥**
श्रीगणेशायनमः॥यथोक्तस्नानानंतरंधौतेवाससीपरिधायकुशासनेस्वस्तिकादौवाप्राङ्मुखउपवि
श्याचम्य॥भस्मआदाय॥वामहस्तेगृहीत्वाऽन्येनपाणिनाच्छाद्य॥ॐ अग्निरितिभस्म।वायुरिति
भस्म । जलमितिभस्म । स्थलमितिभस्म । व्योमेतिभस्म । सर्वःहवाइदंभस्म । मनएतानिच
क्षूःषिभस्मानि ॥ इत्यभिमंत्र्य ॥ ॐ त्र्यम्बकंयजामहेसुगन्धिम्पुष्टिवर्धनम् । उर्वारुकमिवबन्धं ॥१०॥
नान्मृत्योर्मुक्षीयमामृतात् ॥ ॐ प्रसद्यभस्मनायोनिमपश्चपृथिवीमग्ने । सःसृज्यमातृभिष्ट्वञ्ज्यो
तिष्मान्पुनरासदः ॥ इतितस्मिञ्जलंसेचयेन्मर्दयेच्च ॥ ॐ त्र्यायुषञ्जमदग्नेःकश्यपस्यत्र्यायुषम् ।
यद्देवेषुत्र्यायुषन्तन्नोऽअस्तुत्र्यायुषम् ॥ इतिभस्मललाटेहृदयेनाभौगलेंसयोर्बाहुसंधिषुपृष्ठेशिर
सिचधारयेत् ॥ इतिभस्मधारणम् ॥ ततोंगुष्ठमात्रांशिखांगायत्र्या "ॐ मानस्तोकेतनयेमान
आयुषिमानोगोषुमानोअश्वेषुरीरिषः । मानोवीरान्रुद्रभामिनोवधीर्हविष्मन्तःसदमित्वाहवा
महे" इतिमंत्रेणवानैर्ऋत्यांबध्वा ॥ चिद्रूपिणिमहामायेदिव्यतेजःसमन्विते । तिष्ठदेविशिखाबंधे
तेजोवृद्धिंकुरुष्वमे ॥ इतिप्रार्थयेत् ॥ इतिशिखाबंधनम् ॥ ॐत्र्यम्बकंयजामहे० ॥ इतिरुद्राक्ष
मालांधारयेत् ॥ इतिरुद्राक्षमालाधारणम् ॥ **इतिभस्मरुद्राक्षधारणंशिखाबंधनंच** ॥ ॥
॥ ६ ॥ **अथप्रातःसंध्याविधिः** ॥ श्रीगणेशायनमः ॥ यथोक्तस्नानानंतरंधौतवस्त्रपरिधानं
भस्मरुद्राक्षधारणंशिखाबंधनंचकृत्वाचामेत् ॥ ॐ केशवायस्वाहा । ॐ नारायणायस्वाहा ।

ॐ माधवायस्वाहा ॥ इत्याचम्य ॥ ॐ गोविंदायनमः । ॐ विष्णवेनमः । ॐ मधुसूदना यनमः । ॐ त्रिविक्रमायनमः । ॐ वामनायनमः । ॐ श्रीधरायनमः । हृषीकेशाय० । ॐ पद्मनाभाय० । ॐ दामोदराय० । ॐ संकर्षणाय० । ॐ वासुदेवाय० । ॐ प्रद्युम्नाय० । ॐ अनिरुद्धाय० । ॐ पुरुषोत्तमाय० । ॐ अधोक्षजाय० । ॐ नारसिंहाय० । ॐ अच्युताय० । ॐ जनार्दनाय० । ॐ उपेंद्राय० ॐ हरये० । ॐ श्रीकृष्णायनमः ॥ प्रणवपूर्वकद्वादशाक्षरीमहामंत्रस्यपरब्रह्मऋषिः । परमात्मादेवता । दैवीगायत्रीछंदः । सप्तानांव्याहृतीनांविश्वामित्रजमदग्निभरद्वाजगौतमात्रिवसिष्ठकश्यपाऋषयः । अग्निवायुसूर्यबृहस्पतिवरुणेंद्रविश्वेदेवादेवताः । गायत्र्युष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुब्जगत्यश्छन्दांसि । गायत्र्याविश्वामित्रऋषिः । सवितादेवता । गायत्रीछंदः । गायत्रीशिरसःप्रजापतिर्ऋषिः । ब्रह्माग्निवायुसूर्यादेवताः । ॥११॥

यजुश्छंदः । प्राणायामेविनियोगः ॥ ॐ नमोभगवतेवासुदेवाय ॥ इतिमंत्रेणात्मनःप्रदक्षिणमुदकंक्षिपेत् ॥ ॐ भूः । ॐ भुवः । ॐ स्वः । ॐ महः । ॐ जनः । ॐ तपः । ॐ सत्यं ॥ ॐ तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि । धियोयोनः॑प्रचोदयात् ॥ ॐ आपोज्योतीरसोमृतंब्रह्मभूर्भुवःस्वरोम् ॥ एवंत्रिः ॥ ॐ पवित्रेस्थोवैष्णव्यौसवितुर्वः॑प्रसवऽउत्पुनाम्यच्छिद्रेणपवित्रेणसूर्यस्यरश्मिभिः॑ ॥ तस्यंतेपवित्रपतेपवित्रपूतस्ययत्कामःपुनेतच्छकेयम् ॥ इतिपवित्रंधारयेत् ॥ ॐ विष्णुर्विष्णुः । ॐ वाग्वाक् । ॐ प्राणःप्राणः । ॐ चक्षुश्चक्षुः । ॐ श्रोत्रंश्रोत्रम् । ॐ नाभिः । ॐ हृदयम् । ॐ कंठः । ॐ मुखम् । ॐ शिरः । ॐ शिखा । ॐ बाहुभ्यांयशोबलम् ॥ अपवित्रःपवित्रोवेत्यस्यवामदेवऋषिः ॥ विष्णुर्देवता । गायत्रीछंदः । हृदिपवित्रकरणेविनियोगः ॥ ॐ अपवित्रःपवित्रोवासर्वावस्थांगतोपिवा । यःस्मरेत्पुंडरीकाक्षंसबाह्याभ्यंतरःशुचिः ॥ अद्यपूर्वोच्चरि

त० एवंग्रहगुणविशेषेणविशिष्टायांशुभपुण्यतिथौममोपात्तदुरितक्षयद्वाराश्रीपरमेश्वरप्रीत्यर्थंप्रातः संध्योपासनमहंकरिष्ये ॥ इतिसंकल्प्य ॥ पृथिवीतिमंत्रस्यमेरुपृष्ठऋषिः । कूर्मोदेवता । सुतलं छंदः । आसनेवि० ॥ ॐ पृथ्वित्वयाधृतालोकादेवित्वंविष्णुनाधृता । त्वंचधारयमांदेविपवित्रं कुरुचासनम् ॥ अपसर्पंतुतेभूतायेभूताभूमिसंस्थिताः । येभूताविघ्नकर्तारस्तेनश्यंतुशिवाज्ञया ॥१॥ अपक्रामंतुभूतानिपिशाचाःसर्वतोदिशम् । सर्वेषामविरोधेनसंध्याकर्मसमारभे ॥२॥ इति द्वाभ्यांवामपादपार्ष्णिनात्रिवारंभूमिंताडयेत् । अथमार्जनम् ॥ ॐ भूःपुनातु । ॐ भुवःपुनातु । ॐ स्वःपुनातु । ॐ महःपुनातु । ॐ जनःपुनातु । ॐ तपःपुनातु । ॐ सत्यंपुनातु । ॐ खंब्रह्मपुनातु । ॐ आपोहिष्ठामयोभुवः । ॐ तानऽऊर्जेदधातन । ॐ महेरणायचक्षसे ॥ ॐ योवःशिवतमो रसः । ॐ तस्यभाजयतेहनः । ॐ उशतीरिवमातरः ॥ ॐ तस्माऽअरंगमामवः । ॐ यस्य क्षयायजिन्वथ । ॐ आपोजनयथाचनः ॥ इतिमार्जयित्वाशेषमुदकंभुविक्षिपेत् ॥ अथन्यासाः ॥ ॐ अंगुष्ठाग्रेगोविंदायनमः । ॐ तर्जन्यांमहीधराय० । ॐ मध्यमायांहृषीकेशाय० । ॐ अनामिकायांत्रिविक्रमाय० । ॐ कनिष्ठिकायांविष्णवे० । ॐ करमध्येमाधवाय० । ॐ करपृष्ठेहरये० । ॐ मणिबंधेजनार्दनाय० । ॐ भूःअंगुष्ठाभ्यां० । ॐ भुवःतर्जनीभ्यां० । ॐ स्वःमध्यमाभ्यां० । ॐ तत्सवितुर्वरेण्यंअनामिकाभ्यां० । ॐ भर्गोदेवस्यधीमहिकनिष्ठिकाभ्यां० । ॐ धियोयोनःप्रचोदयात्करतलकरपृष्ठाभ्यां० । ॐ भूःहृदयाय० । ॐ भुवःशिरसेस्वाहा । ॐ स्वःशिखायैवषट् । ॐ तत्सवितुर्वरेण्यंकवचायहुम् । ॐ भर्गोदेवस्यधीमहिनेत्रत्रयायवौषट् । ॐ धियोयोनःप्रचोदयात्अस्त्रायफट् । ॐ अकारंनाभौ । ॐ उकारंहृदये । ॐ मकारंमूर्ध्नि । ॐ भूःपादयोः । ॐ भुवःजान्वोः । ॐ स्वःऊर्वोः । ॐ महःजठरे । ॐ जनःकंठे ।

ॐ तपःमुखे । ॐ सत्यंशिरसि । ॐ तकारंपादांगुष्ठयोः । ॐ सकारंगुल्फयोः । ॐ विकारंजंघयोः । ॐ तुकारंजान्वोः । ॐ वकारंऊर्वोः । ॐ रेकारंगुदे । ॐ णिकारंलिंगे । ॐ यकारंकट्याम् । ॐ भकारंनाभौ । ॐ गोकारंउदरे । ॐ देकारंस्तनयोः । ॐ वकारंहृदये । स्यकारंकंठे ॥ ॐ धीकारंमुखे । ॐ मकारंतालुदेशे । ॐ हिकारंनासिकाग्रे । ॐ धिकारंनेत्रयोः । ॐ योकारंभ्रुवोर्मध्ये । द्वितीययोकारंललाटे । ॐ नकारंपूर्वमुखे । ॐ प्रकारंदक्षिणमुखे । ॐ चोकारंपश्चिममुखे । ॐ दकारंउत्तरमुखे । ॐ याकारंमूर्ध्नि । ॐ व्यंजनतकारंव्यापकंसर्वतोन्यसेत् । ॐ आपोगुह्ये । ॐ ज्योतिश्चक्षुषि । ॐ रसोवक्रे । ॐ अमृतंजानुनि । ॐ ब्रह्महृदये । ॐ भूःपादयोः । ॐ भुवःनाभौ । ॐ स्वः ललाटे । ॐ कारंमूर्ध्नि ॥ इतिन्यासाः ॥ गायत्रींत्र्यक्षरांबालांसाक्षसूत्रकमंडलुम् । रक्तवस्त्रांचतुर्हस्तांहंसवाहनसंस्थिताम् ॥ ऋग्वेदेनकृतोत्संगांसर्वदेवनमस्कृतां । ब्रह्माणींब्रह्मदैवत्यांब्रह्मलोकनिवासिनीम् ॥ आवाहयाम्यहंदेवीमायांतींसूर्यमंडलात् ॥ आगच्छवरदेदेवित्र्यक्षरेब्रह्मवादिनि । गायत्रिछंदसांमातर्ब्रह्मयोनिनमोस्तुते ॥ इत्यावाह्य ॥ सूर्यश्चमेत्यस्यनारायणऋषिः । सूर्योदेवता । अनुष्टुप्छंदः । अंबुप्राशनेवि० ॥ ॐ सूर्यश्चमामन्युश्चमन्युपतयश्चमन्युकृतेभ्यःपापेभ्योरक्षंताम् । यद्रात्र्यापापमकार्षम् । मनसावाचाहस्ताभ्याम् । पद्भ्यामुदरेणशिश्ना । रात्रिस्तदवलुंपतु । यत्किंचिद्दुरितंमयि । इदमहंमाममृतयोनौ । सूर्येज्योतिषिजुहोमिस्वाहा । इत्यापःपीत्वाद्विराचम्य॥ आपोहिष्ठेतितृचेनपुनर्मार्जनंकुर्यात् ॥ॐ सुमित्रियानऽआपऽओषधयःसन्तुदुर्मित्रियास्तस्मैसन्तुयोऽस्मान्द्वेष्टियञ्चवयन्द्विष्मः ॥ इतिजलावग्रहणंकुर्यात् ॥ ॐ द्रुपदा०॥इतिजलंवामहस्तेगृहीत्वान्येनपाणिनाच्छाद्य ॥ ॐ ऋतंचसत्यंचाभीद्धात्तपसोध्यजायत । ततोरात्र्यजायततत‌ःसमुद्रोअर्णवः ॥ १ ॥ समुद्रादर्णवादधिसंवत्सरोअ

जायत । अहोरात्राणिविदधद्विश्वस्यमिषतोवशी ॥ २ ॥ सूर्याचंद्रमसौधातायथापूर्वमकल्पयत् ॥ दिवंचपृथिवींचांतरिक्षमथोस्वः ॥ ३ ॥ इतितृचेनतदाच्छादितंजलमवघ्राणपूर्वकंभूमौवामभागेनिक्षिपेत् ॥ प्रणवस्यपरब्रह्मऋषिः । परमात्मादेवता । दैवीगायत्रीछंदः । व्याहृतीनांपरमेष्ठीप्रजापतिःप्रजापतिर्बृहती ॥ गायत्र्याविश्वामित्रऋषिः । सवितादेवता । गायत्रीछंदः । सूर्यार्घ्यदानेवि० ॥ ॐ भूर्भुवःस्वः । ॐ तत्सवितु० ॥ श्रीब्रह्मस्वरूपिणेसूर्यनारायणायनमइदमर्घ्यंदत्तंनमम ॥ एवंत्रिः ॥ दत्तार्घ्योदकेनदक्षिणनासाचक्षुःश्रोत्रस्पर्शनंकुर्यात् ॥ कालातिक्रमेसति "ॐ आकृष्णेनरजसावर्तमानोनिवेशयन्नमृतम्मर्त्यंञ्च । हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन्" इतिमंत्रेणचतुर्थार्घ्यंदद्यात् ॥ असावादित्योब्रह्मेतिमंत्रेणप्रदक्षिणमुदकंक्षिपेत् ॥ आचम्य ॥ उद्वयमुदुत्यमितिद्वयोःप्रस्कण्वऋषिः । सूर्योदेवता । अनुष्टुप्छंदः । चित्रंदेवानामित्यस्य


कुत्सांगिरसऋषिः सूर्योदेवता । त्रिष्टुप्छंदः । तच्चक्षुरित्यस्यदध्यङ्ङाथर्वणऋषिःसूर्योदेवता।उष्णिक्छंदः । सूर्योपस्थानेवि०॥ ॐ उद्वयन्तमसस्परिस्वःपश्यन्तऽउत्तरम् । देवन्देवत्रासूर्यमगन्मज्योतिरुत्तमम्॥१॥उदुत्यञ्जातवेदसन्देवंवहन्तिकेतवः । दृशेविश्वायसूर्यम् ॥२॥चित्रन्देवानामुदगादनीकञ्चक्षुर्मित्रस्यवरुणस्याग्नेः।आप्राद्यावापृथिवीऽअन्तरिक्षꣳसूर्यऽआत्माजगतस्तस्थुषश्च ३तच्चक्षुर्देवहितम्पुरस्ताच्छुक्रमुच्चरत् ।पश्येमशरदःशतञ्जीवेमशरदःशतꣳशृणुयामशरदःशतम्प्रब्रवामशरदःशतमदीनाःस्यामशरदःशतम्भूयश्चशरदःशतात्।४।तेजोसीत्यस्यपरमेष्ठीप्रजापतिर्ऋषिः । आज्यंदेवता।जगतीछंदः।गायत्र्यावाहनेवि० ॥ ॐ तेजोसिशुक्रमस्यमृतमसिधामनामासिप्रियन्देवानामनाधृष्टन्देवयजनमसि ॥ तुरीयपदस्यविमलऋषिः । परमात्मादेवता । गायत्रीछंदः । गायत्र्युपस्थानेवि० । गायत्र्यस्येकपदी । द्विपदी । त्रिपदीचतुष्पद्यपद्यसि । नहिपद्य

॥१५॥

सेनमस्तेतुरीयायदर्शतायपदायपरोरजसेसावदोम् ॥ तत्सवितुरित्यस्यविश्वामित्रऋषिः । सवितादेवता । गायत्रीछंदः । वायव्यंबीजम् । चतुर्थंशक्तिः । पंचविंशतिव्यंजनानिकीलकम् । चतुर्थंपदम् । प्रणवोमुखम् । अग्निर्मुखम् । ब्रह्माशिरः । विष्णुर्हृदयम् । रुद्रःकवचम् । परमात्माशरीरम् । श्वेतवर्णा । सांख्यायनगोत्रा । षड्स्वरा । सरस्वतीजिव्हा । पिंगाक्षीत्रिपदागायत्री । अशेषपापक्षयार्थेजपेवि० ॥ मुक्ताविद्रुमहेमनीलधवलच्छायैर्मुखैस्त्रीक्षणैर्युक्तामिंदुनिबद्धरत्नमुकुटांतत्वात्मवर्णात्मिकाम् ॥ गायत्रींवरदांभयांकुशकशाशुभ्रंकपालंगुणंशंखंचक्रमथारविंदयुगलंहस्तैर्वहन्तींभजे ॥ इतिध्यात्वा । सुमुखंसंपुटंचैवविततंविस्तरंतथा ॥ द्विमुखंत्रिमुखंचैव (एकद्वित्रिमुखंचेतिकेषुचित्पुस्तकेषुपाठः) चतुःपंचमुखंतथा ॥ षण्मुखाधोमुखंचैवव्यापकांजलिकंतथा । शकटंयमपाशंचग्रंथितंचोन्मुखोन्मुखम् ॥ प्रलंबंमुष्टिकंचैवमत्स्यःकूर्मोवराहकम् । सिंहाक्रांतंमहाक्रांतंमुद्गरंपल्लवंतथा ॥ इतिमुद्रादर्शयित्वाप्रणवस्येत्यादिछंदर्षिदेवताश्चपठित्वाष्टोत्तरसहस्रमष्टोत्तरशतमष्टाविंशतिवारंवापदिदशवारंगायत्रींजपित्वा ॥ सुरभिर्ज्ञानयोनीचमत्स्यःकूर्मोथपंकजम् । (सुरभिज्ञानवैराग्यंयोनिशंखोथपंकजमितिकेचित्) लिंगंनिर्वाणकंचैवजपांतेष्टौप्रदर्शयेत् ॥ ॐ विश्वतश्चक्षुरुतविश्वतोमुखोविश्वतोबाहुरुतविश्वतस्पात् । सम्बाहुभ्यान्धमतिसम्पतत्रैर्द्यावाभूमीजनयन्देवऽएकः ॥ एकचक्ररथोयस्यदिव्यःकनकभूषितः । समेभवतुसुप्रीतःपद्महस्तोदिवाकरः ॥ इतिप्रदक्षिणांसूर्यनमस्कारंचकृत्वागायत्र्यादिनमस्कारान्कुर्यात् ॥ तद्यथा ॥ ॐ गायत्र्यैनमः । ॐ सावित्र्यै० । ॐ संध्यायै० । ॐ सरस्वत्यै० । ॐ पूर्वे इंद्राय० । ॐ आग्नेय्यांअग्नये० । ॐ दक्षिणस्यांयमाय० । ॐ नैर्ऋत्यांनिर्ऋतये० । ॐ प्रतीच्यांवरुणाय० । ॐ वायव्यांवायवे । ॐ उदीच्यांकुबेराय० । ॐ ईशान्यांईश्वराय० ॥ ॐ ऊर्ध्वायां

ब्रह्मणे० । ॐ अधस्ताद्विष्णवे० । ॐ अनंताय० ॥ इतिनमस्काराः ॥ देवागात्वित्यस्यमनस
स्पतिर्ऋषिः । वातोदेवताः । विराट्छंदः । जपनिवेदनेवि० ॥ ॐ देवागातुविदोगातुंवित्वागा
तुम्मित । मनसस्पतऽइमन्देवयज्ञᳬस्वाहावातेधाः ॥ अनेनप्रातःसंध्यांगभूतेनयथाशक्तिगा
यत्रीमंत्रजपाख्येनकर्मणाश्रीभगवान्ब्रह्मस्वरूपीसूर्यनारायणःप्रीयतांनमम ॥ इतिजपंनिवेद्य॥
यदक्षरपदभ्रष्टंमात्राहीनंतुयद्भवेत् । तत्सर्वंक्षम्यतांदेविकाश्यपप्रियवादिनि ॥ इतिप्रार्थ्य ॥
उत्तरेशिखरइत्यस्यकश्यपऋषिः । गायत्रीदेवता । अनुष्टुप्छंदः । गायत्र्युद्वासनेवि० ॥ ॐ उ
त्तरेशिखरेदेविभूम्यांपर्वतमस्तके । ब्राह्मणेभ्योविनिर्मुक्तागच्छदेवियथासुखम् ॥ (केचिद्देवागा
त्वित्यनेनगायत्रीविसर्जनंउत्तरेशिखरइत्यनेनसंध्याविसर्जनंचकुर्वंति) अमुकगोत्रोत्पन्नोहंअमु
कप्रवरान्वितोहंशुक्लयजुर्वेदांतर्गतमाध्यंदिनवाजसनेयशाखाध्यायीअमुकशर्माहंभोआचार्यत्वा
मभिवादयामि । भोवैश्वानरत्वामभि० । भोसूर्याचंद्रमसौयुवामभि० । भोयाज्ञवल्क्यत्वाम
भि० । भोईश्वरत्वामभि० ॥ इत्यभिवाद्य ॥ आकाशात्पतितंतोयंयथागच्छतिसागरम् । सर्व
देवनमस्कारःकेशवंप्रतिगच्छति ॥ ततोद्विराचम्य ॥ यस्यस्मृत्याचनामोक्त्यासंध्याजपक्रियादि
षु । न्यूनंसंपूर्णतांयातिसद्योवंदेतमच्युतम् ॥ इतिनत्वा ॥ अनेनप्रातःसंध्योपासनाख्येनकर्म
णाश्रीभगवान्ब्रह्मस्वरूपीसविताप्रीयतांनमम ॥ ॐ विष्णवेनमोविष्णवेनमोविष्णवेनमः ॥ ब्र
ह्मपाशसहस्रेणरुद्रशूलशतेनच । विष्णुचक्रसहस्रेणशिखामुक्तिंकरोम्यहम् ॥ इतिशिखामुक्तिं
कृत्वापुनस्तूष्णींशिखांबध्नीयात् ॥ **इतिप्रातःसंध्याविधिः** ॥ ॥ ७ ॥ **अथपंचायतन
स्थापनविचारः** ॥ श्रीगणेशायनमः ॥ ज्ञानमालायाम् ॥ अथसूर्यपंचायतनम् ॥ सहस्रांशुर्य
दामध्येऐशान्यांपार्वतीपतिम् । आग्नेय्यामेकदंतंचनैर्ऋत्यामच्युतंतथा । वायव्यांपूजयेद्देवींभो

गमोक्षैकभूमिकाम् ॥ अथशिवपंचायतनम् ॥ यदातुशंकरंमध्यऐशान्यांश्रीपतिंयजेत् ।आग्नेय्यांच



तथाहंसंनैर्ऋत्यांपार्वतीसुतं । वायव्यांचसदा पूज्याभवानिभक्तवत्सला ॥ अथगणपतिपंचायतनम् ॥ हेरंबंतुयदामध्यऐशान्यामच्युतंयजेत् । आग्नेय्यांपंचवक्त्रंचनैर्ऋत्यांद्युमणिं यजेत् । वायव्यामंबिकांचैवयजेन्नित्यमतंद्रितः ॥ अथविष्णुपंचायतनम् ॥ यदातुमध्ये गोविंदमैशान्यांशंकरंयजेत् । आग्नेय्यांगणनाथंचनैर्ऋत्यांतपनंतथा । वायव्यामंबिकां चैवयजेन्नित्यंसमाहितः ॥ अथदुर्गापंचायतनम् ॥ भवानीतुयदामध्यऐशान्यांमाधवंयजेत् । आग्नेय्यांपार्वतीनाथंनैर्ऋत्यांगणनायकं । प्रद्योतनंतुवायव्यामाचार्यस्तुप्रपूजयेत् ॥ बोपदेवोपि॥ शंभौमध्यगतेहरीनहरभूदेव्यो (शं, वि, सू, ग, दु.) हरौशंकरेभ्यास्येनागसुता (वि, शं, ग, सू, दु.) रवौहरगणेशाजांबिकाः (सू, शं, ग, वि, दु.) स्थापिताः । देव्यांविष्णुहरैकदंतरवयो (दु, वि, शं, ग, सू.) लंबोदरेजेश्वरेनार्याः (ग, वि, शं, सू, दु.) शंकरभागतोतिसुखदाव्यस्तास्तुतेहानिदाः ॥ स्वस्थानवर्जितादेवाःशोकदुःखभयप्रदाः । तन्मंडलस्थितोराजासाधकश्चविनश्यति ॥ इतिपंचायतनस्थापनविचारः ॥ ॥ ८ ॥ अथदेवपूजा ॥ श्रीगणेशायनमः ॥ आचम्यप्राणानायम्य ॥ ॐ स्वस्तिनऽइन्द्रोवृद्धश्रवाःस्वस्तिनःपूषाविश्ववेदाः । स्वस्तिनस्तार्क्ष्यो अरिष्टनेमिःस्वस्तिनोबृहस्पतिर्दधातु ॥ १ ॥ ॐ भद्रंकर्णेभिःशृणुयामदेवाभद्रम्पश्येमाक्षभिर्य

य०व्र० जत्राः । स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेमहि देवहितं यदायुः ॥ २ ॥ ॐ तम्पत्नीभिरनुगच्छे कर्म०
॥१८॥ मदेवाः पुत्रैर्भ्रातृभिरुत वा हिरण्यैः । नाकङ्गृभ्णानाः सुकृतस्य लोके तृतीये पृष्ठे ऽअधि रोचने दिवः ॥
॥ ३ ॥ इतिमंगलोच्चारणम् ॥ श्रीमन्महागणाधिपतयेनमः ॥ इष्टदेवताभ्यो० ॥ कुलदेवता
भ्यो० । ग्रामदेवताभ्यो० । स्थानदेवताभ्यो० । वास्तुदेवताभ्यो० । वाणीहिरण्यगर्भाभ्यां० ।
श्रीलक्ष्मीनारायणाभ्यां० । श्रीउमामहेश्वराभ्यां० । शचीपुरंदराभ्यां० । मातापितृचरणकमला
भ्यां० । सर्वेभ्योदेवेभ्यो० । सर्वेभ्योब्राह्मणेभ्यो० ॥ निर्विघ्नमस्तु० ॥ सुमुखश्चैकदंतश्चकपिलोग
जकर्णकः । लंबोदरश्चविकटोविघ्ननाशोगणाधिपः ॥ धूम्रकेतुर्गणाध्यक्षोभालचंद्रोगजाननः ।
द्वादशैतानिनामानियःपठेच्छृणुयादपि ॥ विद्यारंभेविवाहेचप्रवेशेनिर्गमेतथा । संग्रामेसंकटेचैव ॥१८॥
विघ्नस्तस्यनजायते ॥ शुक्लांबरधरंदेवंशशिवर्णंचतुर्भुजं । प्रसन्नवदनंध्यायेत्सर्वविघ्नोपशांतये ॥

अभीप्सितार्थसिध्यर्थंपूजितोयःसुरासुरैः । सर्वविघ्नहरस्तस्मैगणाधिपतयेनमः ॥ सर्वमंगलमां
गल्येशिवेसर्वार्थसाधिके । शरण्येत्र्यंबकेगौरिनारायणिनमोस्तुते । सर्वदासर्वकार्येषुनास्तितेषा
ममंगलम् । येषांहृदिस्थोभगवान्मंगलायतनंहरिः ॥ तदेवलग्नंसुदिनंतदेवताराबलंचंद्रबलंतदे
व । विद्याबलंदैवबलंतदेवलक्ष्मीपतेतेंघ्रियुगंस्मरामि ॥ लाभस्तेषांजयस्तेषांकुतस्तेषांपराजयः ।
येषामिन्दीवरश्यामोहृदयस्थोजनार्दनः ॥ विनायकंगुरुंभानुंब्रह्मविष्णुमहेश्वरान् । सरस्वतीं
प्रणम्यादौसर्वकार्यार्थसिद्धये ॥ यत्रयोगेश्वरःकृष्णोयत्रपार्थोधनुर्धरः । तत्रश्रीर्विजयोभूतिर्ध्रु
वानीतिर्मतिर्मम ॥ सर्वेष्वारंभकार्येषुत्रयस्त्रिभुवनेश्वराः । देवादिशंतुनःसिद्धिंब्रह्मेशानजनार्द
नाः ॥ आपदामपहर्तारंदातारंसुखसंपदाम् । लोकाभिरामंश्रीरामंभूयोभूयोनमाम्यहम् ॥ वि
श्वेशंमाधवंढुंढिंदंडपाणिंचभैरवम् । वंदेकाशींगुहांगंगांभवानींमणिकर्णिकाम् ॥ दक्षिणहस्तेसा

क्षतजलमादाय ॥ विष्णुर्विष्णुर्विष्णुः ॥ श्रीमद्भगवतोमहापुरुषस्यविष्णोराज्ञयाप्रवर्तमानस्य
अद्यश्रीब्रह्मणोद्वितीयेपरार्धे विष्णुपदेश्रीश्वेतवाराहकल्पे सप्तमेवैवस्वतमन्वंतरेअष्टाविंशतिमेक
लियुगेकलिप्रथमचरणेभरतखंडेभरतवर्षेजंबुद्वीपेनैमिषारण्ये आर्यावर्तांतरगतब्रह्मावर्तैकदेशेक
न्याकुमारिकाक्षेत्रेश्रीमहानर्मदायामह्याश्चोत्तरेतीरेविक्रमशकेबौद्धावतारे अस्मिन्वर्तमाने अमुक
नाम्निसंवत्सरेअमुकायनेअमुकर्तौअमुकमासे अमुकपक्षेअमुकतिथौअमुकवासरेअमुकनक्षत्रेअ
मुकराशिस्थितेचंद्रेअमुकराशिस्थितेसूर्येअमुकराशिस्थितेदेवगुरौ शेषेषुग्रहेषुयथायथाराशिस्थान
स्थितेषुसत्सुएवंग्रहगुणविशेषणविशिष्टायांशुभपुण्यतिथौ ममात्मनः श्रुतिस्मृतिपुराणोक्तफलप्रा
प्त्यर्थंश्रीअमुकदेवप्रमुखपंचायतनदेवताप्रीत्यर्थं यथाशक्तियथाज्ञानेनयथामिलितोपचारद्रव्यैःपू
जनमहंकरिष्ये ॥ तदंगत्वेनादौगणपतिस्मरणासनादिपुरुषसूक्तन्यासांश्चकलशपूजनंशंखघंटापू

जनंचकरिष्ये ॥ वक्रतुंडमहाकायकोटिसूर्यसमप्रभ।निर्विघ्नंकुरुमेदेवसर्वकार्येषुसिद्धिद ॥ इति
स्मृत्वा ॥ पृथ्वित्वयेत्यासनउपविश्य ॥ ॐ अनंतासनायनमः । ॐ विमलासनाय० । ॐ
कूर्मासनाय० । ॐ योगासनाय० । ॐ मध्येपरमसुखासनायनमः ॥ इतिनमस्कृत्य ॥ अपक्रा
मंतु० । सर्वेषामविरोधेनपूजाकर्मसमारभे ॥ इतिभूतशुद्धिंकृत्वा ॥ तीक्ष्णदंष्ट्रमहाकायकल्पांत
दहनोपम । भैरवायनमस्तुभ्यमनुज्ञांदातुमर्हसि ॥ इतिभैरवाज्ञांगृहीत्वा ॥ सहस्रशीर्षेतिषो
डशर्चस्यसूक्तस्यनारायणऋषिः । पुरुषोदेवता । अनुष्टुप्छंदः ॥ अंत्यात्रिष्टुप् । शरीरशुध्यर्थेपु
रुषसूक्तन्यासेवि० ॥ ॐ सहस्रशीर्षा० । वामकरायनमः ॥ ॐ पुरुषऽएवेदं० ॥ दक्षिणकरा
य० ॥ ॐ एतावा० । वामपादाय० ॥ ॐ त्रिपादूर्ध्व० । दक्षिणपादाय० ॥ ॐ ततोविरा० ।
वामजानवे० ॥ ॐ तस्माद्यज्ञात्सर्वहुतस्सम्भृतं० । दक्षिणजानवे० । ॐ तस्माद्यज्ञात्सर्वहुतऽऋ

चं० । वामकट्यै० ॥ ॐ तस्मादश्वा० । दक्षिणकट्यै० । ॐ तंयज्ञं० । नाभ्यै० ॥ ॐ यत्पु
रुषं० । हृदयाय० ॥ ॐ ब्राह्मणो० । कंठाय० ॥ ॐ चन्द्रमा० । वामबाहवे० । ॐ नाभ्यां० ।
दक्षिणबाहवे० ॥ ॐ यत्पुरुषेण० । मुखाय० ॥ ॐ सप्तास्यां० । अक्षिभ्यां० ॥ ॐ यज्ञेनय
ज्ञ० । मूर्ध्नेनमः ॥ इतिन्यासान्कृत्वाकलशेजलंसंपूर्यदेवताआवाहयेत् ॥ तद्यथा ॥ सर्वेसमु
द्राःसरितस्तीर्थानिजलदानदाः । आयांतुदेवपूजार्थंदुरितक्षयकारकाः ॥ कलशस्यमुखेविष्णुः
कंठेरुद्रःसमाश्रितः । मूलेतत्रस्थितोब्रह्मामध्येमातृगणाःस्मृताः ॥ कुक्षौतुसागराःसर्वेसप्तद्वी
पावसुंधरा ॥ ऋग्वेदोथयजुर्वेदःसामवेदोह्यथर्वणः । अंगैश्चसहिताःसर्वेकलशंतुसमाश्रिताः ॥
अत्रगायत्रीसावित्रीशांतिपुष्टिकरीतथा।आयांतुदेवपूजार्थंदुरितक्षयकारकाः॥इत्यावाह्य॥ततोव
रुणमावाहयेत्॥ॐ तत्त्वायामिब्रह्मणावन्दमानस्तदाशास्तेयजमानोहविर्भिः। अहेडमानोवरुणे

हबोध्युरुशꣳसमानऽआयुःप्रमोषीः ॥ अस्मिन्कलशेवरुणंसांगंसपरिवारंसायुधंसशक्तिमावाहया
मि॥ॐभूर्भुवःस्वः । वरुणायनमःसकलपूजार्थेगंधाक्षतपुष्पाणिसमर्पयामि ॥ अपवित्रःपवित्रोवे
तिकलशोदकेनात्मानंपूजाद्रव्याणिचप्रोक्ष्य ॥ कलशमुद्रांप्रदर्शयेत्॥शंखादौचंद्रदैवत्यंकुक्षौवरुण
देवताः । पृष्ठेप्रजापतिश्चैवअग्रेगंगासरस्वती ॥ त्वंपुरासागरोत्पन्नोविष्णुनाविधृतःकरे । अग्रतः
सर्वदेवानांपांचजन्यनमोस्तुते ॥ पांचजन्यायविद्महेपावमानायधीमहि । तन्नःशंखःप्रचोदयात्॥
ॐ अग्निर्ऋषिःपवमानःपाञ्चजन्यःपुरोहितः । तमीमहेमहागयम् ॥ ॐ भूर्भुवःस्वः । शंखस्थ
देवतायैनमःआवाहयामि । सर्वोपचारार्थेगंधपुष्पतुलसीपत्राणिसमर्पयामि । नमस्करोमि ।
शंखमुद्रांप्रदर्श्य ॥ आगमार्थंतुदेवानांगमनार्थंतुरक्षसां । कुरुघंटारवंतत्रदेवताह्वानसिद्धये ॥
ॐ सुपर्णोसिगरुत्माँस्त्रिवृत्तेशिरोगायत्रञ्चक्षुर्बृहद्रथन्तरेपक्षौ । स्तोमऽआत्माछन्दाꣳस्यङ्गानिय

श०प्र० जूंᳩषिनामं । सामंतेतनूर्वामदेव्यंबंज्ञाबज्ञियम्पुछन्धिषण्यांᳵशफाः । सुपर्णोसिगरुत्मान्दिवङ्ग कर्म.
॥२१॥ च्छस्वᳶपत ॥ ॐ भूर्भुवःस्वः । गरुडायनमःआवाहयामि । सर्वोपचारार्थेगंधाक्षतपुष्पाणिस
मर्पयामि । नमस्करोमि । घंटामुद्रांप्रदर्श्य ॥ अत्रकेचिद्दीपपूजनंकुर्वंति ॥ तद्यथा ॥ भक्त्या
दीपंप्रयच्छामिदेवायपरमात्मने । त्राहिमांनिरयाद्घोराद्दीपज्योतिर्नमोस्तुते ॥ ॐ अग्नि
ज्योतिर्ज्योतिरग्निःस्वाहासूर्योज्योतिर्ज्योतिᳵसूर्यᳵस्वाहा । अग्निर्वर्चोज्योतिर्वर्चᳵस्वाहासूर्योवर्चो
ज्योतिर्वर्चᳵस्वाहा । ज्योतिᳵसूर्यᳵसूर्योज्योतिᳵस्वाहा ॥ दीपस्थदेवतायैनमः आवाहयामि ।
सर्वोपचारार्थेगंधाक्षतपुष्पाणिसम० । नमस्करोमि ॥ अत्रदेहवद्देवेष्वपिन्यासांश्चपुरुषसूक्तेन
कुर्यात् ॥ अथध्यानानि ॥ ध्येयःसदासवितृमंडलमध्यवर्तीनारायणःसरसिजासनसन्निविष्टः । ॥२१॥
केयूरवान्मकरकुंडलवान्किरीटीहारीहिरण्मयवपुर्धृतशंखचक्रः ॥ १ ॥ ध्यायेन्नित्यंमहेशंरजत

गिरिनिभंचारुचंद्रावतंसंरत्नाकल्पोज्ज्वलांगंपरशुमृगवराभीतिहस्तंप्रसन्नं । पद्मासीनंसमंतात्स्तु
तममरगणैर्व्याघ्रकृत्तिंवसानंविश्वाद्यंविश्ववंद्यंनिखिलभयहरंपंचवक्त्रंत्रिनेत्रम् ॥ २ ॥ श्वेतांगंश्वे
तवस्त्रंसितकुसुमगणैःपूजितंश्वेतगंधैःक्षीराब्धौरत्नदीपैःसुरनरतिलकंरत्नसिंहासनस्थम् । दो
र्भिःपाशांकुशाब्जाभयवरमनसंचंद्रमौलिंत्रिनेत्रंध्यायेच्छांत्यर्थमीशंगणपतिममलंश्रीसमेतंप्रसन्नम्
॥ ३ ॥ शांताकारंभुजगशयनंपद्मनाभंसुरेशंविश्वाधारंगगनसदृशंमेघवर्णंशुभांगम् । लक्ष्मी
कांतंकमलनयनंयोगिभिर्ध्यानगम्यंवंदेविष्णुंभवभयहरंसर्वलोकैकनाथम् ॥ ४ ॥ नमोदेव्यैम
हादेव्यैशिवायैसततंनमः । नमःप्रकृत्यैभद्रायैनियताःप्रणताःस्मताम् ॥ ५ ॥ इतिक्रमेणेनहरे
भास्याजांबिकानांपुराणोक्तध्यानानि ॥ अथतेषांक्रमेणवेदोक्तानिलिख्यंते ॥ ॐ सूर्यरश्मिर्हरि
केशᳵपुरस्तात्सविताज्योतिरुदयाँ२ ॥ ऽअजस्त्रम् । तस्यपूषाप्रसवेयांतिविद्वान्सम्पश्यन्विश्वाभु

वेनानिगोपाः ॥ १ ॥ इतिसूर्यस्य ॥ ॐ नमस्तेरुद्रमन्यवऽउतोतऽइषवेनमः । बाहुभ्यामुत
तेनमः॥२॥इतिशिवस्य॥ॐ नमोगणेभ्योगणपतिभ्यश्चवोनमोनमोव्रातेभ्योव्रातपतिभ्यश्चवोनमो
नमोगृत्सेभ्योगृत्सपतिभ्यश्चवोनमोनमोविरूपेभ्योविश्वरूपेभ्यश्चवोनमः॥ ३ ॥ इतिगणेशस्य॥
ॐ विष्णोरराटमसिविष्णोःश्नप्त्रेस्थोविष्णोःस्यूरसिविष्णोर्ध्रुवोसि । वैष्णवमसिविष्णवेत्वा ॥
॥ ४ ॥ इतिविष्णोः॥ॐ मनसःकाममाकूतिंवाचःसत्यमशीय । पशूनाꣳरूपमन्नस्यरसोयशः
श्रीःश्रयतांमयिस्वाहा ॥५॥ इतिदेव्याः॥ ॐ सहस्र०।ॐ भूर्भुवःस्वःश्रीअमुकदेवप्रमुखपंचाय
तनदेवताभ्योनमः ध्यानंसमर्पयामि ॥ [ॐ भूर्भुवःस्वःश्रीअमुकदेवप्रमुखपंचायतनदेवताभ्यो
नमः इतिसर्वेषूपचारेषुग्राह्यं] रम्यंसुशोभनंदिव्यंसर्वसौख्यकरंशुभम् । आसनंचमयादत्तंगृहा
णपरमेश्वर॥ॐ पुरुष०। आसनंस०॥ उष्णोदकंनिर्मलंचसर्वसौगंध्यसंयुतं । पादप्रक्षालनार्थाय

दत्तंमेप्रतिगृह्यतां॥ॐ एतावा०। पाद्यंस०। अर्घ्यंगृहाणदेवेशगंधपुष्पाक्षतैःसह।करुणाकरमेदे
वगृहाणार्घ्यंनमोस्तुते॥ॐ त्रिपादूर्ध्व०। अर्घ्यंस०। सर्वतीर्थसमायुक्तंसुगंधिनिर्मलंजलं । आच
म्यतांमयादत्तंगृहीत्वापरमेश्वर। ॐ ततोविरा०। आचमनीयंस० ॥ गंगासरस्वतीरेवापयोष्णी
नर्मदाजलैः।स्नापितोसिमयादेवतथाशांतिंकुरुष्वमे। ॐ तस्माद्यज्ञात्सर्वहुतःसम्भृतं०॥स्नानंस०
॥ अथपंचामृतस्नानं। कामधेनुसमुत्पन्नंसर्वेषांजीवनंपरं। पावनंयज्ञहेतुश्चपयःस्नानार्थमर्पितम्॥
ॐ पयःपृथिव्याम्पयओषधीषुपयोदिव्यन्तरिक्षेपयोधाः । पयस्वतीःप्रदिशःसन्तुमह्यम् ॥ प
यःस्नानंस० । पयःस्नानांतरेणशुद्धोदकस्नानंस० । शुद्धोदकस्नानांतरेणाचमनीयंस० । सकल
पूजार्थेगंधाक्षतपुष्पाणिस० ॥ [पंचामृतस्नानेशुद्धोदकाचमनीयगंधाक्षतपुष्पाणिसर्वत्र] पयस
स्तुसमुद्भूतंमधुराम्लंशशिप्रभं । दध्यानीतंमयादेवस्नानार्थंप्रतिगृह्यतां ॥ ॐ दधिक्राव्णो

ऽअकारिषञ्जिष्णोरश्वस्यवाजिनः । सुरभिनोमुखाकरत्प्रणऽआयूंᳩषितारिषत ॥ दधिस्नानंस० । शुद्धोदकादिपूर्ववत् ॥ नवनीतसमुत्पन्नंसर्वसंतोषकारकं । घृतंतुभ्यंप्रदास्यामिस्नानार्थंप्रतिगृह्यतां ॥ ॐ घृतम्मिमिक्षेघृतमस्ययोनिर्घृतेश्रितोघृतम्वस्यधाम । अनुष्वधमावहमादयस्वस्वाहाकृतंवृषभवक्षिहव्यम् ॥ घृतस्नानंस० ॥ तरुपुष्पसमुद्भूतंसुस्वादुमधुरंमधु । तेजःपुष्टिकरंदिव्यंस्नानार्थंप्रतिगृह्यतां ॥ ॐ मधुवाताऽऋतायतेमधुक्षरन्तिसिन्धवः । माध्वीर्नःसन्त्वोषधीः ॥ मधुनक्तमुतोषसोमधुमत्पार्थिवꣳरजः । मधुद्यौरस्तुनः पिता ॥ मधुमान्नोवनस्पतिर्मधुमाँ२ ॥ ऽअस्तुसूर्यः । माध्वीर्गावोभवन्तुनः ॥ मधुस्नानंस० ॥ इक्षुसारसमुद्भूताशर्करापुष्टिकारिका । मलापहारिकादिव्यास्नानार्थंप्रतिगृह्यतां ॥ ॐ अपाᳩरसमुद्वयसꣳसूर्येसन्तꣳसमाहितम् । अपाᳩरसस्ययोरसस्तंवोगृह्णाम्युत्तममुपयामगृहीतोसीन्द्रायत्वाजुष्टङ्गृह्णाम्येषतेयोनिरिन्द्रायत्वाजुष्टतमम् ॥ शर्करास्नानंस० ॥ इतिपंचामृतस्नानं ॥ मलयाचलसंभूतंचंदनागरुसंभवं । चंदनंदेवदेवेशस्नानार्थंप्रतिगृह्यतां ॥ ॐ त्वांगन्धर्वाऽअखनँस्त्वामिन्द्रस्त्वाम्बृहस्पतिः । त्वामोषधेसोमोराजाविद्वान्यक्ष्मादमुच्यत ॥ गंधोदकस्नानंस० ॥ शुद्धोदकादिपूर्ववत् ॥ नानासुगंधिद्रव्यंचचंदनंरजनीयुतं ॥ उद्वर्तनंमयादत्तंस्नानार्थंप्रतिगृह्यतां ॥ ॐ अꣳशुनातेऽअꣳशुःपृच्यताम्परुषापरुः । गन्धस्तेसोममवतुमदायरसोऽअच्युतः ॥ उद्वर्तनस्नानंस० ॥ आपोहिष्ठेतितृचेनशुद्धोदकस्नानंस० । आचमनीयंस० ॥ विलेपनार्थेचंदनं० । अलंकारार्थेअक्षतान्० । पूजार्थेपुष्पाणिबिल्वदलानिदूर्वांकुरान्तुलसीदलानिच स० । धूपंस० । दीपंदर्शयामि । पयशर्करागुडनैवेद्यंपंचामृतनैवेद्यंवास० ॥ इत्यंतंसंक्षिप्तांपूजां कृत्वोत्तरेनिर्माल्यंविसृज्यगंधाक्षतपुष्पबिल्वदलदूर्वांकुरतुलसीपत्रादियथासंभवैर्यथायोग्यैःपुनर

भ्यर्च्यधारापात्रायगंधाक्षतपुष्पादिसमर्प्यपंचायतनानुसारेणसूर्याथर्वशीर्षरुद्रगणेशाथर्वशीर्षना
रायणाथर्वशीर्षलक्ष्मीसूक्तादिभिःपुरुषसूक्तेनचाभिषेकंकुर्यात ॥ तदनंतरं ॥ ॐ द्यौःशान्तिरन्त
रिक्षꣳशान्तिः पृथिवीशान्तिरापꣳशान्तिरोषधयꣳशान्तिः।वनस्पतयꣳशान्तिर्विश्वेदेवाःशान्तिर्ब्रह्म
शान्तिꣳसर्वꣳशान्तिः शान्तिरेवशान्तिꣳसामाशान्तिरेधि॥ यतोयतꣳसमीहसेततोनोऽअभयंकुरु।
शन्नःकुरुप्रजाभ्योभयन्नꣳपशुभ्यः ॥ॐ सर्वेषांवाऽएषवेदानाꣳरसोयत्सामसर्वेषामेवैनमेतद्वेदा
नाꣳरसेनाभिषिञ्चति॥ॐ शान्तिःशान्तिःसुशांतिर्भवतु। सर्वारिष्टशांतिर्भवतु। ॐ अमृताभिषे
कोस्तु ॥ एतैरप्यभिषेकंकुर्यात् ॥ ॐ भूर्भुवःस्वः। श्रीअमुकदेवप्रमुखपंचायतनदेवताभ्योनमः
अभिषेकस्नानंस० ॥ अभिषेकस्नानांतेशुद्धोदकस्नानं० ॥ आचमनीयं० ॥ सर्वभूषादिकेसौम्ये
लोकलज्जानिवारणे। मयोपपादितेतुभ्यंवाससीत्वंगृहाण मे ॥ ॐ तस्माद्यज्ञात्सर्वहुतऽऋचः० ।

वस्त्रंस० ॥ नवभिस्तंतुभिर्युक्तंत्रिगुणंदेवतामयं। उपवीतंचोत्तरीयंगृहाणपरमेश्वर ॐ तस्माद
श्वा०।यज्ञोपवीतंस०॥श्रीखंडंचंदनंदिव्यंगंधाढ्यंसुमनोहरं। विलेपनंसुरश्रेष्ठचंदनंप्रतिगृह्यतां॥
ॐ त्वांगन्धर्वा०। ॐ तंयज्ञम्०चंदनंस०॥अक्षताश्चसुरश्रेष्ठकुंकुमाक्ताःसुशोभिताः। मयानिवेदि
ताभक्त्यागृहाणपरमेश्वर॥ॐअक्षन्नमीमन्तह्यवप्रियाऽअधूषत। अस्तोषतस्वभानवोविप्रानवि
ष्ठयामतीयोजान्विन्द्रतेहरी॥अक्षतान्स०।[नाक्षतान्विष्णवे] माल्यादीनिसुगंधीनिमालत्यादीनिवै
प्रभो।मयाहृतानिपुष्पाणिगृहाणपरमेश्वर॥ॐयत्पुरु०। पुष्पाणिस०।त्रिदलंत्रिगुणाकारंत्रिनेत्रंचत्रि
यायुधं। त्रिजन्मपापसंहारमेकबिल्वंशिवार्पणं॥त्रिशाखैर्बिल्वपत्रैश्चअछिद्रैःकोमलैःशुभैः।तवपूजां
करिष्यामिएकबिल्वं०॥ दर्शनंबिल्ववृक्षस्यस्पर्शनंपापनाशनं। अघोरपापसंहारमेकबिल्वं०॥ तुल
सीबिल्वनिर्गुंडीजंबीरामलकीतथा।पंचबिल्वमितिख्यातमेकबिल्वं०॥ॐशिवोभवप्रजाभ्योमानुषी

भ्यस्त्वमंङ्गिरः। माद्यावांपृथिवीऽअभिशोचीर्मान्तरिक्षम्मावनस्पतीन्॥ एतैर्मंत्रैःशिवपंचाक्षरमंत्रे णवाशिवायबिल्वपत्राणिस०॥विष्णवादिसर्वदेवानांदूर्वेत्वंप्रीतिदासदा। क्षीरसागरसंभूतेवंशवृद्धि करीभव॥ॐ काण्डांत्काण्डात्प्ररोहंन्तीपरुषःपरुषस्परि। एवानोदूर्वेप्रतनुसहस्रेणशतेनंच॥गणेशा यदूर्वांकुरान्स०॥तुलसींहेमरूपांचरत्नरूपांचमंजरीं। भवमोक्षप्रदांतुभ्यमर्पयामिहरिप्रियां॥ ॐ विष्णोःकर्माणिपश्यतयतोव्रतानिपस्पशे।इन्द्रस्ययुज्यःसखा॥इतिकेशवादिभिर्वाविष्णवेतुलसी पत्राणिस०॥हरिद्रांकुंकुमंचैवसिंदूरादिसमन्वितं।सौभाग्यद्रव्यसंयुक्तंगृहाणपरमेश्वर॥ ॐअहिंरि वभोगैःपर्यैतिबाहुञ्ज्यायाहेतिम्पंरिबाधंमानः।हस्तघ्नोविश्वावयुनानिविद्वान्पुमान्पुमांꣳसम्परि पातुविश्वतः॥ हरिद्राकुंकुमादिसौभाग्यद्रव्याणिस०॥ वनस्पतिरसोद्भूतोगंधाढ्योगंधउत्त मः। आघ्रेयःसर्वदेवानांधूपोयंप्रतिगृह्यतां॥ ॐ ब्राह्मणो०। धूपंस०॥ साज्यंचवर्तिसंयु

क्तंवन्हिनायोजितंमया। दीपंगृहाणदेवेशत्रैलोक्यतिमिरापह॥ ॐ चन्द्रमा०। दीपंदर्शया मि॥ शर्कराखंडखाद्यानिदधिक्षीरघृतानिच। आहारंभक्ष्यभोज्यंनैवेद्यंप्रतिगृह्यतां॥ नैवेद्यंगृ ह्यतांदेवभक्तिंमेह्यचलांकुरु। ईप्सितंमेवरंदेहिपरत्रचपरांगतिं॥ चतुरस्रमंडलोपरिनैवेद्यपात्रं निधाय। नैवेद्यं ॐ नाभ्याऽआसी०॥गायत्रीमंत्रेणवातुलसीदलेनसंप्रोक्ष्यतत्तुलसीदलंनैवेद्योप रिनिधायधेनुमुद्रांप्रदर्श्य॥ॐअमृतोपस्तरणमसि॥इतिपूर्वाचमनीयंसमर्प्यसव्यहस्तांगुलीःसमा नाःकृत्वानैवेद्यमर्पयेत्॥तद्यथा॥ ॐ प्राणायस्वाहा॥ ॐ अपानायस्वाहा। ॐ व्यानायस्वाहा। ॐ उदानायस्वाहा। ॐ समानायस्वाहा। ॐब्रह्मणेस्वाहा॥इतिनैवेद्यंसमर्प्यनैवेद्यमध्येपानीयंद त्वापुनर्नैवेद्यमर्पयित्वा॥[पूजायांशर्करादिनैवेद्यं। देवयज्ञोत्तरंपक्वान्ननैवेद्यं] उत्तरापोशनंस०॥ह स्तप्रक्षालनंस०॥ मुखप्रक्षालनंस०॥ आचमनीयंस०॥ करोद्वर्तनार्थेचंदनंस०॥ पुगीफलंमह

द्दिव्यंनागवल्लीदलैर्युतं । एलाचूर्णादिसंयुक्तंतांबूलंप्रतिगृह्यतां॥ॐ यत्पुरुषेण० । तांबूलंस०॥इदं
फलंमयादेवस्थापितंपुरतस्तव । तेनमेसफलावाप्तिर्भवेज्जन्मनिजन्मनि । ॐ याःफलिनीर्याऽअफ
लाऽअपुष्पायाश्चपुष्पिणीः । बृहस्पतिप्रसूतास्तानोमुञ्चन्त्वᳪहसः॥फलंस०॥हिरण्यगर्भगर्भस्थं
हेमबीजंविभावसोः । अनंतपुण्यफलदमतःशांतिंप्रयच्छमे ॥ ॐ हिरण्यगर्भःसमवर्त्तताग्रेभूतस्य
जातःपतिरेकऽआसीत् । सदाधारपृथिवीन्द्यामुतेमाङ्कस्मैदेवायहविषाविधेम ॥ दक्षिणांस० ॥ र
त्नदीपिकांप्रज्वाल्यगंधाक्षतपुष्पैरभ्यर्च्य ॥ कदलीगर्भसंभूतंकर्पूरंचप्रदीपितं । आरार्तिकम
हंकुर्वेपश्यमेवरदोभव॥ॐ इदᳪहविःप्रजननम्मेऽअस्तुदशवीरᳪसर्वगणᳪस्वस्तये ।आत्मसनि
प्रजासनिपशुसनिलोकसन्यभयसनि । अग्निःप्रजाम्बहुलाम्मेकरोत्वन्नम्पयोरेतोऽअस्मासुधत्त॥ ॥२६॥
कर्पूरगौरंकरुणावतारंसंसारसारंभुजगेंद्रहारं । सदावसंतंहृदयारविंदेभवंभवानीसहितंनमामि ॥

मंगलंभगवान्विष्णुर्मंगलंगरुडध्वजः ॥ मंगलंपुंडरीकाक्षोमंगलायतनंहरिः ॥ सर्वमंगलमांग
ल्येशिवेसर्वार्थसाधिके । शरण्येत्र्यंबकेगौरिनारायणिनमोस्तुते ॥ कर्पूरारार्तिकं० ॥ यानि
कानिचपापानिजन्मांतरकृतानिच । तानितानिविनश्यंतिप्रदक्षिणपदेपदे ॥ ॐ सप्तास्या० । प्रद
क्षिणांस०। अपराधसहस्राणिक्रियंतेहर्निशंमया । दासोहमितिमांमत्वाक्षमस्वपरमेश्वर॥ नाना
सुगंधपुष्पाणियथाकालोद्भवानिच । पुष्पांजलिंमयादत्तंगृहाणपरमेश्वर ॥ ॐ यज्ञेनयज्ञं० ।
ॐराजाधिराजायप्रसह्यसाहिने । नमोवयंवैश्रवणायकुर्महे । समेकामान्कामकामायमह्यं ।
कामेश्वरोवैश्रवणोददातु । कुबेरायवैश्रवणाय । महाराजायनमः ॥ ॐ स्वस्ति । साम्रा
ज्यंभौज्यंस्वाराज्यंवैराज्यंपारमेष्ठ्यंराज्यंमहाराज्यमाधिपत्यमयंसमंतपर्यायीस्यात्सार्वभौमःसा
र्वायुषआन्तादापरार्धात् । पृथिव्यैसमुद्रपर्यंतायाएकराडिति ।तदप्येषश्लोकोभिगीतोमरुतःपरिवे

ष्टारोमरुत्तस्यावसन्गृहे।आविक्षितस्यकामप्रेर्विश्वेदेवाःसभासदइति॥ॐ विश्वतश्चक्षुः०॥नमस्कार
पूर्वकमंत्रपुष्पांजलिंसमर्पयामि ॥ आवाहनंनजानामिनजानामितवार्चनं । पूजांचैवनजानामिक्षम
स्वपरमेश्वर ॥ मंत्रहीनंक्रियाहीनंभक्तिहीनंसुरेश्वर।यत्पूजितंमयादेवपरिपूर्णंतदस्तुमे॥भूमौस्खलि
तपादानांभूमिरेवावलंबनं।त्वयिजातापराधानांत्वमेवशरणंविभो।यदक्षरपदभ्रष्टंमात्राहीनंतुयद्भवे
त्। तत्सर्वंक्षम्यतांदेवप्रसीदपरमेश्वर॥अन्यथाशरणंनास्तित्वमेवशरणंमम।तस्मात्कारुण्यभावेन
रक्षमांपरमेश्वर॥गतंदुःखंगतंपापंगतंदारिद्र्यमेवच । आगतासुखसंपत्तिःपुण्योहंतवदर्शनात् ॥ इति
प्रार्थ्य॥शंखमध्येस्थितंतोयंभ्रामितंकेशवोपरि।अंगलग्नंमनुष्याणांब्रह्महत्यांव्यपोहतु ॥इतिशंखंदे
वोपरिभ्रामयित्वातस्यजलेनस्वशरीरंमार्जयेत्॥अकालमृत्युहरणंसर्वव्याधिविनाशनं।देवपादोद
कंतीर्थंजठरेधारयाम्यहं॥इतिदेवतीर्थंपिबेत्।अनेनयथाशक्तियथाज्ञानेनयथामिलितोपचारद्रव्यैः

कृतपूजनेनश्रीअमुकदेवप्रमुखपंचायतनदेवताःप्रीयंतांनमम॥तत्सद्ब्रह्मार्पणमस्तु॥ यस्यस्मृत्याच
नामोक्त्यादेवपूजाक्रियादिषु । न्यूनं० ॥ ॐ विष्णवेनमोविष्णवेनमोविष्णवेनमः ॥ इतिदे
वपूजा ॥ ॥ ९ ॥ **अथसूर्याथर्वशीर्षम्** ॥ श्रीगणेशायनमः ॥ अस्यश्रीसूर्याथर्वशीर्षस्यब्र
ह्माऋषिः । आदित्योदेवता । गायत्रीछंदः । हंसाद्यग्निनारायणयुक्तबीजं । हृल्लेखाशक्तिः ।
द्विपदादिसर्गसंयुक्तंकीलकं ॥ धर्मार्थकाममोक्षेषुजपेपूजायामभिषेकेवावि० ॥ षट्स्वरारूढबीजे
नषडंगंरक्तांबुजस्थितंसप्ताश्वरथिनंहिरण्यवर्णंचतुर्भुजंपद्मद्वयाभयवरदहस्तंकालचक्रप्रणेतारंच
श्रीसूर्यनारायणंयऽएवंवेदसवैब्राह्मणः॥ॐ भूः ॐभुवः।ॐस्वः।ॐमहः।ॐजनःॐ तपः।ॐसत्यं।
ॐ तत्सवितु०।परोरजसेसावदोम्।ॐ आपोज्योतीरसोमृतंब्रह्मभूर्भुवःस्वरोम्। सूर्यआत्माजगत
स्तस्थुषश्च । सूर्याद्वैखल्विमानिभूतानिजायंते । सूर्याद्यज्ञाःपर्जन्योन्नमात्मा॥नमस्तेआदित्याय।

त्वमेवकेवलंकर्त्तासि । त्वमेवप्रत्यक्षंविष्णुरसि । त्वमेवप्रत्यक्षंब्रह्मासि । त्वमेवप्रत्यक्षंरुद्रोसि । त्वमेवप्रत्यक्षमृगसि। त्वमेवप्रत्यक्षंयजुरसि। त्वमेवप्रत्यक्षंसामासि । त्वमेवप्रत्यक्षमथर्वासि । त्व मेवसर्वंछंदोसि । आदित्याद्वायुर्जायते । आदित्याद्भूमिर्जायते । आदित्यादापोजायंते । आ दित्याज्ज्योतिर्जायते।आदित्याद्व्योमादिशोजायंते।आदित्याद्वेदाजायंते।आदित्याद्देवाजायंते।आ दित्योवाएषएतन्मंडलंतपति।असावादित्योब्रह्म । आदित्योंतःकरणमनोबुद्धिचित्ताहंकाराः । आ दित्योवैव्यानसमानोदानापानप्राणाः।आदित्योवैश्रोत्रत्वक्चक्षुरसनानासाः । आदित्योवैवाक्पा णिपादोपस्थपायूनि । आदित्योवैशब्दस्पर्शरूपरसगंधाः । आदित्योवैवचनादानगमनानं दविसर्गाः । आनंदमयोज्ञानमयोविज्ञानमयआदित्यः । नमोमित्रायभानवेमृत्योर्मापहिभ्रा जिष्णवेविश्वहेतवेनमः । सूर्योनोदिवस्पातुवातोअन्तरिक्षात् । अग्निर्नःपार्थिवेभ्यः । सूर्या

द्भवंतिभूतानि । सूर्येणपालितानितु । सूर्येलयंप्राप्नुवंति । यःसूर्यःसोहमेवच । चक्षु र्नोदेवःसविता । चक्षुर्नउतपर्वतः । चक्षुर्धातादधातुनः । आदित्यायविद्महेसहस्रकराय धीमहि । तन्नःसूर्यःप्रचोदयात् ॥ सवितापश्चात्तात् । सवितापुरस्तात् । सवितोत्तरात्तात् । स विताधरात्तात् । सवितानःसुवतुसर्वतातिम् । सवितानोरासतांदीर्घमायुः। ओमित्येकाक्षरंब्रह्मघृ णिरितिद्वेअक्षरेसूर्यइत्यक्षरद्वयं । आदित्यइतित्रीण्यक्षराणि । एतद्वैसूर्यस्याष्टाक्षरंमनुं ॥ यःस दाहरहर्जपतिसोब्रह्मण्योब्राह्मणोभवति । सूर्याभिमुखंजप्त्वामहाव्याधिभयात्प्रमुच्यते।अलक्ष्मी र्नश्यति । अभक्ष्यभक्षणात्पूतोभवति।अपेयपानात्पूतोभवति । अगम्यगमनात्पूतोभवति । ब्रा त्यसंभाषणात्पूतोभवति।मध्यान्हेसूर्याभिमुखःपठेत्।सद्यःपंचमहापापात्प्रमुच्यते। सैषासावित्री विद्यानकस्यचित्प्रशंसेत्।एतन्महाभागःप्रातःपठतिसभाग्यवाञ्जायते।पशून्विन्दति। वेदार्थंलभ

ते। त्रिकालंजस्वाक्रतुशतफलंप्राप्नोति।हस्तादित्येजपतिसमहामृत्युंतरति।यएवंवेद।इत्युपनिषत्
॥इतिसूर्याथर्वशीर्षम्॥१०॥अथरुद्रः॥ श्रीगणेशायनमः॥ ॐ गणानांन्त्वागणपतिꣳहवामहेप्रि
याणांन्त्वाप्रियपतिꣳहवामहेनिधीनान्त्वांनिधिपतिꣳहवामहेवसोमम।आहमंजानिगर्भधमात्वमं
जासिगर्भधम्॥१॥गायत्रीत्रिष्टुब्जगत्यनुष्टुप्पङ्क्त्यासह । बृहत्युष्णीहांककुप्सूचीभिं÷शम्यन्तुत्वा
॥२॥द्विपदायाश्चतुष्पदास्त्रिपदायाश्चषट्पदाः । विछंन्दायाश्चसँछंन्दाःसूचीभिं÷शम्यन्तुत्वा॥३॥
सहस्तोमाःसहछंन्दसऽआवृतं÷सहप्रमाऽऋषयःसप्तदैव्याः । पूर्वेषांपन्थामनुदृश्यधीराऽअ
न्वालेभिरेरथ्योनरश्मीन् ॥ ३४ ॥ यज्जाग्रतोदूरमुदैतिदैवन्तदुसुप्तस्यतथैवेतिं । दूरङ्गमज्ज्यो
तिंषाज्ज्योतिरेकन्तन्मेमनं÷शिवसंङ्कल्पमस्तु ॥ ५ ॥ येनकर्माण्यपसोमनीषिणोयज्ञेकृण्वन्तिवि
दथेषुधीराः । यदपूर्वंयक्षमन्तःप्रजानान्तन्मेमनं÷शिव० ॥६ ॥ यत्प्रज्ञानंमुतचेतोधृतिश्चयज्ज्यो
तिरन्तरमृतम्प्रजासुं । यस्मान्नऽऋतेकिञ्चनकर्मक्रियतेतन्मेमनं÷० ॥७॥ येनेदम्भूतम्भुवंनम्भवि
ष्यत्परिगृहीतममृतेनसर्वम् । येनयज्ञस्तायतेसप्तहोतातन्मेमनं÷०॥ ८ ॥ यस्मिन्नृचःसामयजूꣳ
षियस्मिन्प्रतिष्ठितारथनाभाविवाराः । यस्मिंश्चित्तꣳसर्वमोतम्प्रजानान्तन्मेमनं÷० ॥ ९ ॥
सुषारथिरश्वानिवयन्मंनुष्यान्नेनीयतेभीशुंभिर्वाजिनंऽइव । हृत्प्रतिष्ठंयदजिरञ्जविष्ठन्तन्मेम
नं÷०॥१०॥इतिप्रथमोध्यायः ॥ ॐसहस्रशीर्षेतिषोडश॥१६॥अद्भ्यःसंभृतःपृथिव्यैरसाच्चविश्वकं
र्मणःसमंवर्ततताग्रें । तस्यत्वष्टाविदधद्रूपमेतितन्मर्त्यस्यदेवत्वमाजानमग्रें ॥ १७ ॥ वेदाहमेत
म्पुरुषम्महान्तमादित्यवर्णन्तमसःपरस्तात् । तमेवविदित्वातिमृत्युमेतिनान्यःपन्थाविद्यतेयना
य ॥ १८ ॥ प्रजापतिश्चरतिगर्भेऽअन्तरजायमानोबहुधाविजायते । तस्ययोनिम्परिपश्यन्ति
धीरास्तस्मिन्हतस्थुर्भुवनानिविश्वा ॥ १९ ॥ योदेवेभ्यंऽआतपतियोदेवानांपुरोहितः । पू

य०ब्रा० वेंषोदेवेभ्योजातोनमोरुचायब्राह्मये ॥ २० ॥ रुचम्ब्राह्मञ्जनयन्तोदेवाऽअग्रेतदब्रुवन् । य कर्म.
स्त्वैवम्ब्राह्मणोविद्यात्तस्यदेवाऽअसन्वशे ॥ २१ ॥ श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्ष
॥३०॥ त्राणिरूपमश्विनौव्यात्तम् । इष्णन्निषाणामुम्मऽइषाणसर्वलोकम्मऽइषाण ॥ २२ ॥ इति
द्वितीयोध्यायः ॥ आशुःशिशानोवृषभोनभीमोघनाघनःक्षोभणश्चर्षणीनाम् । सङ्क्रन्दनोनिमि
षऽएकवीरःशतꣳसेनाऽअजयत्साकमिन्द्रः ॥ १ ॥ सङ्क्रन्दनेनानिमिषेणजिष्णुनायुत्कारेण
दुश्च्यवनेनधृष्णुना । तदिन्द्रेणजयततत्सहध्वंयुधोनरऽइषुहस्तेनवृष्णा ॥ २ ॥ सऽइषु
हस्तैःसनिषङ्गिभिर्वशीसꣳस्रष्टासयुधऽइन्द्रोगणेन ॥ सꣳसृष्टजित्सोमपाबाहुशर्ध्युग्रधन्वा
प्रतिहिताभिरस्ता ॥ ३ ॥ बृहस्पतेपरिदीयारथेनरक्षोहामित्राँ२ ॥ ऽअपबाधमानः । ॥३०॥
प्रभञ्जन्त्सेनाःप्रमृणोयुधाजयन्नस्माकमेध्यवितारथानाम् ॥ ४ ॥ बलविज्ञायस्थविरःप्रवीरः

सहस्वान्वाजीसहमानऽउग्रः । अभिवीरोऽअभिसत्त्वासहोजाजैत्रमिन्द्ररथमातिष्ठगोवित् ॥
॥ ५ ॥ गोत्रभिदङ्गोविदंवज्रबाहुञ्जयन्तमज्मप्रमृणन्तमोजसा । इमꣳसजाताऽअनुवीरयध्वमि
न्द्रꣳसखायोऽअनुसꣳरभध्वम् ॥ ६ ॥ अभिगोत्राणिसहसागाहमानोदयोवीरःशतमन्युरिन्द्रः ।
दुश्च्यवनःपृतनाषाडयुध्योस्माकꣳसेनाऽअवतुप्रयुत्सु ॥ ७ ॥ इन्द्रऽआसान्नेताबृहस्पतिर्दक्षिणाय
ज्ञःपुरऽएतुसोमः । देवसेनानामभिभञ्जतीनाञ्जयन्तीनाम्मरुतोयन्त्वग्रम् ॥ ८ ॥ इन्द्रस्यवृष्णो
वरुणस्यराज्ञऽआदित्यानाम्मरुताꣳशर्धऽउग्रम् । महामनसाम्भुवनच्यवानाङ्घोषोदेवानाञ्ज
यतामुदस्थात् ॥ ९ ॥ उद्धर्षयमघवन्नायुधान्युत्सत्वनाम्मामकानाम्मनाꣳसि । उद्वृत्रहन्वाजिनां
वाजिनान्युद्रथानाञ्जयतांयन्तुघोषाः ॥ १० ॥ अस्माकमिन्द्रःसमृतेषुध्वजेष्वस्माकंयाऽइषवस्ताज
यन्तु । अस्माकंवीराऽउत्तरेभवन्त्वस्माँ२ ॥ ऽउदेवाऽअवताहवेषु ॥ ११ ॥ अमीषाञ्चित्तम्प्रतिलो

य०अ० भयन्तीगृहाणाङ्गान्यप्वेपरेहि । अभिप्रेहिनिर्दहहृत्सुशोकैरन्धेनामित्रास्तमसासचन्ताम् ॥१२॥ कर्म·
अवसृष्टापरापतशरव्येब्रह्मसᳫशिते । गच्छामित्रान्प्रपद्यस्वमामीषाङ्कञ्चनोच्छिषः ॥१३॥ प्रेताज
॥३१॥ यतानरऽइन्द्रोवःशर्मयच्छतु । उग्रावःसन्तुबाहवोनाधृष्यायथासथ ॥१४॥ असौयासेनामरुतः
परेषामभ्यैतिनऽओजसास्पर्धमाना । तांगूहततमसापव्रतेनयथामीऽअन्योऽअन्यन्नजानन् ॥
॥१५॥ यत्रबाणाःसम्पतन्तिकुमाराविशिखाऽइव । तन्नऽइन्द्रोबृहस्पतिरदितिःशर्मयच्छतुविश्वाहा
शर्मयच्छतु ॥१६॥ मर्माणितेवर्मणाच्छादयामिसोमस्त्वाराजामृतेनानुवस्ताम् । उरोर्वरीयोवरुणस्ते
कृणोतुजयन्तन्त्वानुदेवामदन्तु ॥ १७ ॥ इतितृतीयोध्यायः ॥ ॐ विभ्राड्बृहत्पिबतुसोम्यम्म
ध्वायुर्दधद्यज्ञपतावविह्रुतम् । वातजूतोयोऽअभिरक्षतित्मनाप्रजाःपुपोषपुरुधाविराजति ॥ १ ॥ ॥३१॥
उदुत्यञ्जातवेदसन्देवंवहन्तिकेतवः । दृशेविश्वायसूर्यम् ॥२॥ येनापावकचक्षसाभुरण्यन्तञ्जनाँ॥

ऽअनु । त्वंवरुणपश्यसि ॥ ३ ॥ दैव्यावध्वर्यूऽआगतᳫरथेनसूर्यत्वचा । मध्वायज्ञᳫसमञ्जाथे ।
तम्प्रत्नथायंवेनश्चित्रन्देवानाम् ॥४॥ तम्प्रत्नथापूर्वथाविश्वथेमथाज्येष्ठतातिम्बर्हिषदᳫस्वर्विद
म् । प्रतीचीनंवृजनन्दोहसेधुनिमाशुञ्जयन्तमनुयासुवर्धसे ॥५॥ अयंवेनश्चोदयत्पृश्निगर्भाज्यो
तिर्जरायुरजसोविमाने । इममपाᳫसङ्गमेसूर्यस्यशिशुन्नविप्रामतिभीरिहन्ति ॥ ६ ॥ चित्रन्देवा
नामुदगादनीकञ्चक्षुर्मित्रस्यवरुणस्याग्नेः । आप्राद्यावापृथिवीऽअन्तरिक्षᳫसूर्यऽआत्माजगतस्त
स्थुषश्च ॥ ७ ॥ आनऽइडाभिर्विदथेसुशस्तिविश्वानरःसवितादेवऽएतु । अपियथायुवानो
मत्सथानोविश्वञ्जगदभिपित्वेमनीषा ॥ ८ ॥ यदद्यकच्चवृत्रहन्नुदगाऽअभिसूर्य । सर्वन्तदिन्द्र
तेवशे ॥ ९ ॥ तरणिर्विश्वदर्शतोज्योतिष्कृदसिसूर्य । विश्वमाभासिरोचनम् ॥ १० ॥ तत्सूर्य
स्यदेवत्वन्तन्महित्वम्मध्याकर्तोर्विततᳫसञ्जभार । यदेदयुक्तहरितःसधस्थादाद्रात्रीवासस्तनुतेसि

य०ब्र० मस्मै ॥ ११ ॥ तन्मित्रस्यवरुणस्याभिचक्षेसूर्योरूपङ्कृणुतेद्योरुपस्थे । अनन्तमन्यद्रुशदस्यपा कर्म.
जः कृष्णमन्यद्धरितःसम्भरन्ति ॥१२॥बण्महाँ२ ॥ ऽअसिसूर्यबडादित्यमहाँ२ ॥ असि । मह
॥३२॥ स्तेसतोमहिमापनस्यतेद्धादेवमहाँ२ ॥ ऽअसि ॥ १३ ॥ बट्सूर्यश्रवसामहाँ२ ॥ असिसत्रादेवम
हाँ२ ॥ असि । मन्हादेवानामसुर्यः पुरोहितोविभुज्योतिरदाभ्यम् ॥ १४ ॥ श्रायन्तऽइव
सूर्यंविश्वेदिन्द्रस्यभक्षत । वसूनिजातेजनमानऽओजसाप्रतिभागन्नदीधिम ॥ १५ ॥
अद्यादेवाऽउदितासूर्यस्यनिरꣳहसःपिपृतानिरवद्यात् । तन्नोमित्रोवरुणोमामहन्तामदितिःसि
न्धुः पृथिवीऽउतद्यौः ॥ १६ ॥ आकृष्णेनरजसावर्तमानोनिवेशयन्नमृतम्मर्त्यञ्च । हिरण्ययेन
सवितारथेनादेवोयातिभुवनानिपश्यन् ॥ १७ ॥ इतिचतुर्थोध्यायः ॥ ॐ नमस्तेरुद्रमन्यवऽ ॥३२॥
उतोतऽइषवेनमः। बाहुभ्यामुततेनमः ॥ १ ॥ यातेरुद्रशिवातनूरघोरापापकाशिनी । तयान

स्तन्वाशन्तमयागिरिशन्ताभिचाकशीहि ॥ २ ॥ यामिषुङ्गिरिशन्तहस्तेबिभर्ष्यस्तवे । शिवा
ङ्गिरित्रताङ्कुरुमाहिꣳसीःपुरुषञ्जगत् ॥ ३ ॥ शिवेनवचसात्वागिरिशाच्छावदामसि । यथानःसर्व
मिज्जगदयक्ष्मꣳसुमनाऽअसत् ॥ ४ ॥ अध्यवोचदधिवक्ताप्रथमोदैव्योभिषक् । अहीँश्चस
र्वाञ्जम्भयन्त्सर्वांश्चयातुधान्योधराचीःपरासुव ॥ ५ ॥ असौयस्ताम्रोऽअरुणऽउतबभ्रुःसुमङ्ग
लः । येचैनꣳरुद्राऽअभितोदिक्षुश्रिताःसहस्रशोवैषाꣳहेडईमहे ॥ ६ ॥ असौयोवसर्पतिनी
लग्रीवोविलोहितः । उतैनङ्गोपाऽअदृश्रन्नदृश्रन्नुदहार्यःसदृष्टोमृडयातिनः ॥ ७ ॥ नमोस्तुनी
लग्रीवायसहस्राक्षायमीढुषे । अथोयेऽअस्यसत्वानोहन्तेभ्योकरन्नमः ॥ ८ ॥ प्रमुञ्चधन्वन
स्त्वमुभयोरार्त्न्योर्ज्याम् ॥ याश्चतेहस्तऽइषवःपराताभगवोवप ॥ ९ ॥ विज्यन्धनुःकपर्दि
नोविशल्योबाणवाँ२ ॥ ऽउत । अनेशन्नस्ययाऽइषवऽआभुरस्यनिषङ्गधिः ॥ १० ॥ यातेहे

तिमींढुष्टमहस्तेबभूवतेधनुः । तयास्मान्विश्वतस्त्वमयक्ष्मयापरिभुज ॥ ११ ॥ परितेधन्वनो
हेतिरस्मान्वृणक्तुविश्वतः । अथोयऽइषुधिस्तवारेऽअस्मन्निधेहितम् ॥ १२ ॥ अवतत्यधनु
ष्ट्वᳪसहस्राक्षशतेषुधे।निशीर्यशल्यानाम्मुखाशिवोनःसुमनाभव ॥ १३ ॥ नमस्तऽआयुधायाना
ततायधृष्णवे । उभाभ्यामुततेनमोबाहुभ्यान्तवधन्वने॥१४॥मानोमहान्तमुतमानोऽअर्भकम्मान
ऽउक्षन्तमुतमानऽउक्षितम् । मानोवधीःपितरम्मोतमातरम्मानःप्रियास्तन्वोरुद्ररीरिषः॥ १५ ॥
मानस्तोकेतनयेमानऽआयुषिमानोगोषुमानोऽअश्वेषुरीरिषः मानोवीरान्रुद्रभामिनोवधीर्हविष्म
न्तःसदमित्वाहवामहे ॥ १६ ॥ नमोहिरण्यबाहवेसेनान्येदिशाञ्चपतयेनमोनमोवृक्षेभ्योहरि
केशेभ्यःपशूनाम्पतयेनमोनमः शष्पिञ्जरायत्विषीमतेपथीनाम्पतयेनमोनमोहरिकेशायोपवीतिने
पुष्टानाम्पतयेनमोनमोबभ्लुशाय ॥ १७ ॥ नमोबभ्लुशायव्याधिनेऽन्नानाम्पतयेनमोनमोभव

स्यहेत्यैजगताम्पतयेनमोनमोरुद्रायाततायिनेक्षेत्राणाम्पतयेनमोनमःसूतायाहन्त्यैवनानाम्पत
येनमोनमोरोहिताय ॥ १८ ॥ नमोरोहितायस्थपतयेवृक्षाणाम्पतयेनमोनमोभुवन्तयेवारिवस्कृ
तायौषधीनाम्पतयेनमोनमोमन्त्रिणेवाणिजायकक्षाणाम्पतयेनमोनमऽउच्चैर्घोषायाक्रन्दयतेपत्ती
नाम्पतयेनमोनमःकृत्स्नायतया ॥१९॥ नमःकृत्स्नायतयाधावतेसत्वनाम्पतयेनमोनमःसहमा
नायनिव्याधिनऽआव्याधिनीनाम्पतयेनमोनमोनिषङ्गिणेककुभायस्तेनानाम्पतयेनमोनमोनिचेर
वेपरिचरायारण्यानाम्पतयेनमोनमोवञ्चते ॥ २० ॥ नमोवञ्चतेपरिवञ्चतेस्तायूनाम्पतयेनमोनमो
निषङ्गिणऽइषुधिमतेतस्कराणाम्पतयेनमोनमःसृकायिभ्योजिघांᳪसद्भ्योमुष्णताम्पतयेनमोन
मोसिमद्भ्योनक्तञ्चरद्भ्योविकृन्तानाम्पतयेनमः ॥ २१ ॥ नमऽउष्णीषिणेगिरिचरायकुलु
ञ्चानाम्पतयेनमोनमऽइषुमद्भ्योधन्वायिभ्यश्चवोनमोनमऽआतन्वानेभ्यःप्रतिदधानेभ्यश्चवोन

मोनमऽआयच्छद्भ्योस्यद्भ्यश्चवोनमोनमोविसृजद्भ्यः ॥ २२ ॥ नमोविसृजद्भ्योविध्यद्भ्यश्च
वोनमोनमः स्वपद्भ्योजाग्रद्भ्यश्चवोनमोनमः शयानेभ्यऽआसीनेभ्यश्चवोनमोनमस्तिष्ठद्भ्योधाव
द्भ्यश्चवोनमोनमः सभाभ्यः ॥ २३ ॥ नमः सभाभ्यः सभापतिभ्यश्चवोनमोनमोश्वेभ्योश्व
पतिभ्यश्चवोनमोनमऽआव्याधिनीभ्योविविध्यन्तीभ्यश्चवोनमोनमऽउगणाभ्यस्तृꣳहतीभ्यश्चवो
नमोनमोगणेभ्यः ॥ २४ ॥ नमोगणेभ्योगणपतिभ्यश्चवोनमोनमोव्रातेभ्योव्रातपतिभ्यश्चवोनमोन
मोगृत्सेभ्योगृत्सपतिभ्यश्चवोनमोनमोविरूपेभ्योविश्वरूपेभ्यश्चवोनमोनमः सेनाभ्यः ॥ २५ ॥ नमः
सेनाभ्यः सेनानिभ्यश्चवोनमोनमोरथिभ्योऽअरथेभ्यश्चवोनमोनमः क्षतृभ्यः सङ्ग्रहीतृभ्यश्चवो
नमोनमोमहद्भ्योऽअर्भकेभ्यश्चवोनमः ॥ २६ ॥ नमस्तक्षभ्योरथकारेभ्यश्चवोनमोनमः कुलालेभ्यः
कर्मारेभ्यश्चवोनमोनमोनिषादेभ्यः पुञ्जिष्ठेभ्यश्चवोनमोनमः श्वनिभ्योमृगयुभ्यश्चवोनमोनमः
श्वभ्यः ॥ २७ ॥ नमः श्वभ्यः श्वपतिभ्यश्चवोनमोनमोभवायचरुद्रायचनमः शर्वायचपशुपतयेच
नमोनीलग्रीवायचशितिकण्ठायचनमः कपर्दिने ॥ २८ ॥ नमः कपर्दिनेचव्युप्तकेशायचनमः सहस्रा
क्षायचशतधन्वनेचनमोगिरिशयायचशिपिविष्टायचनमोमीढुष्टमायचेषुमतेचनमोह्रस्वाय ॥ २९ ॥
नमोह्रस्वायचवामनायचनमोबृहतेचवर्षीयसेचनमोवृद्धायचसवृधेचनमोग्र्यायचप्रथमायचनमऽ
आशवे ॥ ३० ॥ नमऽआशवेचाजिरायचनमः शीघ्र्यायचशीभ्यायचनमऽऊर्म्यायचावस्वन्या
यचनमोनादेयायचद्वीप्यायच ॥ ३१ ॥ नमोज्येष्ठायचकनिष्ठायचनमः पूर्वजायचापरजायचन
मोमध्यमायचापगल्भायचनमोजघन्यायचबुध्न्यायचनमः सोभ्याय ॥ ३२ ॥ नमः सोभ्यायच
प्रतिसर्यायचनमोयाम्यायचक्षेम्यायचनमः श्लोक्यायचावसान्यायचनमऽउर्वर्यायचखल्यायचन
मोवन्याय ॥ ३३ ॥ नमोवन्यायचकक्ष्यायचनमः श्रवायचप्रतिश्रवायचनमऽआशुषेणायचा

शुरथायचनमश्शूरायचावभेदिनेचनमोबिल्मिने ॥ ३४ ॥ नमोबिल्मिनेचकवचिनेचनमोवर्मि
॥२५॥ णेचवरूथिनेचनमःश्रुतायचश्रुतसेनायचनमोदुन्दुभ्यायचाहनन्यायचनमोधृष्णवे ॥ ३५ ॥
नमोधृष्णवेचप्रमृशायचनमोनिषङ्गिणेचेषुधिमतेचनमस्तीक्ष्णेषवेचायुधिनेचनमःस्वायुधायच
सुधन्वनेच ॥ ३६ ॥ नमःस्रुत्यायचपथ्यायचनमःकाट्यायचनीप्यायचनमःकुल्यायचसरस्या
यचनमोनादेयायचवैशन्तायचनमःकूप्याय ॥ ३७ ॥ नमःकूप्यायचावट्यायचनमोवीध्र्याय
चातप्यायचनमोमेघ्यायचविद्युत्यायचनमोवर्ष्यायचावर्ष्यायचनमोवात्याय ॥ ३८ ॥ नमोवा
त्यायचरेष्म्यायचनमोवास्तव्यायचवास्तुपायचनमःसोमायचरुद्रायचनमस्ताम्रायचारुणायच
नमःशङ्गवे ॥३९॥ नमःशङ्गवेचपशुपतयेचनमऽउग्रायचभीमायचनमोग्रेवधायचदूरेवधाय ॥२५॥
चनमोहन्त्रेचहनीयसेचनमोवृक्षेभ्योहरिकेशेभ्योनमस्ताराय ॥४०॥नमःशम्भवायचमयोभवाय

चनमःशङ्करायचमयस्करायचनमःशिवायचशिवतरायच ॥४१॥ नमःपार्यायचावार्यायचनमः
प्रतरणायचोत्तरणायचनमस्तीर्थ्यायचकूल्यायचनमःशष्प्यायचफेन्यायचनमःसिकत्याय।४२।
नमःसिकत्यायचप्रवाह्यायचनमःकिꣳशिलायचक्षयणायचनमःकपर्दिनेचपुलस्तयेचनमऽइरि
ण्यायचप्रपथ्यायचनमोव्रज्याय ॥ ४३ ॥ नमोव्रज्यायचगोष्ठ्यायचनमस्तल्प्यायचगेह्यायच
नमोहृदय्यायचनिवेष्प्यायचनमःकाट्यायचगह्वरेष्ठायचनमःशुष्क्याय ॥ ४४ ॥ नमःशुष्क्या
यचहरित्यायचनमःपाꣳसव्यायचरजस्यायचनमोलोप्यायचोलप्यायचनमऽऊर्व्यायचसू
र्व्यायचनमःपर्णाय ॥ ४५ ॥ नमःपर्णायचपर्णशदायचनमऽउद्गुरमाणायचाभिघ्नतेचनमऽआ
खिदतेचप्रखिदतेचनमऽइषुकृद्भ्योधनुष्कृद्भ्यश्चवोनमोनमोवःकिरिकेभ्योदेवानाꣳहृदयेभ्योनमोवि
चिन्वत्केभ्योनमोविक्षिणत्केभ्योनमऽआनिर्हतेभ्यः ॥ ४६ ॥ द्रापेऽअन्धसस्पतेदरिद्रनीललो

हित । आसाम्प्रजानामेषाम्पशूनाम्माभेर्मारोङ्मोचनःकिञ्चनाममत् ॥ ४७ ॥ इमारुद्रायतव
सेकपर्दिनेक्षयद्वीरायप्रभरामहेमतीः। यथाशमसद्द्विपदेचतुष्पदेविश्वम्पुष्टङ्ग्रामेऽअस्मिन्ननातुरम्॥
 ॥४८॥ यातेरुद्रशिवातनूःशिवाविश्वाहाभेषजी । शिवारुतस्यभेषजीतयानोमृडजीवसे ॥४९॥
परिनोरुद्रस्यहेतिर्वृणक्तुपरित्वेषस्यदुर्मतिरघायोः । अवस्थिरामघवद्भ्यस्तनुष्वमीढ्वस्तोकायतनं
यायमृड ॥ ५० ॥ मीढुष्टमशिवतमशिवोनः÷सुमनाभव । परमेवृक्षऽआयुधन्निधायकृत्तिंवसा
नऽआचरपिनाकम्बिभ्रदागहि ॥ ५१ ॥ विकिरिदविलोहितनमस्तेऽअस्तुभगवः । यास्तेसह
स्रꣳहेतयोन्यमस्मन्निवपन्तुताः ॥ ५२ ॥ सहस्राणिसहस्रशोबाह्वोस्तवहेतयः÷ । तासामीशा
नोभगवःपराचीनामुखाकृधि ॥५३॥ असङ्ख्यातासहस्राणियेरुद्राऽअधिभूम्याम् । तेषाꣳ
सहस्रयोजनेवधन्वानितन्मसि ॥ ५४ ॥ अस्मिन्महत्यर्णवेन्तरिक्षेभवाऽअधि । तेषाꣳ

स० ॥ ५५ ॥ नीलग्रीवाःशितिकण्ठादिवꣳरुद्राऽउपश्रिताः। तेषाꣳस० ॥ ५६ ॥ नीलग्री
वाःशितिकण्ठाःशर्वाऽअधःक्षमाचराः । तेषाꣳस० ॥५७॥ येवृक्षेषुशष्पिञ्जरानीलग्रीवाविलो
हिताः । तेषाꣳ० ॥ ५८ ॥ येभूतानामधिपतयोविशिखासः÷कपर्दिनः÷ । तेषाꣳ० ॥५९॥
येपथाम्पथिरक्षयऽऐलबृदाऽआयुर्युधः÷ । तेषाꣳ० ॥ ६० ॥ येतीर्थानिप्रचरन्तिसृकाहस्ता
निषङ्गिणः÷ । तेषाꣳ० ॥ ६१ ॥ येन्नेषुविविध्यन्तिपात्रेषुपिबतोजनान् । तेषाꣳ०॥ ६२ ॥
यऽएतावन्तश्चभूयाꣳसश्चदिशोरुद्रावितस्थिरे । तेषाꣳ० ॥ ६३ ॥ नमोस्तुरुद्रेभ्योयेदिविये
षांवर्षमिषवः। तेभ्योदशप्राचीर्दशदक्षिणादशप्रतीचीर्दशोदीचीर्दशोर्ध्वाः।तेभ्योनमोऽअस्तुतेनोव
न्तुतेनोमृडयन्तुतेयन्द्विष्मोयश्चनोद्वेष्टितमेषाञ्जम्भेदध्मः ॥ ६४ ॥ नमोस्तुरुद्रेभ्योयेन्तरिक्षेयेषां
वातऽइषवः । तेभ्यो० ॥ ६५ ॥ नमोस्तुरुद्रेभ्योयेपृथिव्यांयेषामन्नमिषवः । तेभ्यो० ॥६६ ॥

॥ इतिपंचमोध्यायः ॥ ॐ वयꣳसोमव्रतेतवमनंस्तनूषुबिभ्रंतः । प्रजावंन्तःसचेमहि ॥१॥ एष
तेंरुद्रभागःसहस्वस्राम्बिकयातञ्जुषस्वस्वाहैषतेरुद्रभागऽआखुस्तेंपशुः ॥ २ ॥ अवंरुद्रमंदीमह्य
वंदेवन्त्र्यंम्बकम् । यथानोवस्यंसस्करद्यथानःश्रेयंसस्करद्यथानोव्यवसाययांत् ॥ ३ ॥ भेषज
मंसिभेषजङ्गवेश्वायपुरुषायभेषजम् । सुषम्मेषायंमेष्यै ॥ ४ ॥ त्र्यंम्बकंयजामहेसुगन्धिम्पुंष्टि
वर्धनम् । उर्वारुकमिंवबन्धनान्मृत्योर्मुक्षीयमामृतांत् । त्र्यम्बकंयजामहेसुगन्धिम्पतिवेदनम् ।
उर्वारुकमिंवबन्धनादितोमुक्षीयमामुतः ॥ ५ ॥ एतत्तेरुद्रावसन्तेनंपरोमूजंवतोतींहि । अवंत
तधन्वापिनांकावसःकृत्तिवासाऽअहिंसन्नःशिवोतींहि ॥ ६ ॥ त्र्यायुषञ्जमदंग्नेःकश्यपंस्यत्र्यायु
षम् । यद्देवेषुत्र्यायुषन्तन्नोंऽअस्तुत्र्यायुषम् ॥ ७ ॥ शिवोनामांसिस्वधिंतिस्तेपितानमंस्तेऽअ
स्तुमामांहिꣳसीः । निवंर्त्तयाम्यायुंषेन्नाद्यांयप्रजननायरायस्पोषांयसुप्रजास्त्वायंसुवीर्याय ॥८॥

॥ इतिषष्ठोध्यायः ॥ ॐ उग्रश्चंभीमश्चध्वान्तश्चधुनिश्च । सासह्वाँश्चांभियुग्वाचंविक्षिपःस्वाहां
॥ १ ॥ अग्निꣳहृदंयेनाशनिꣳहृदयाग्रेणंपशुपतिङ्कृत्स्नहृदंयेनभवंयक्ना । शर्वम्मतंस्नाभ्यामी
शांनम्मन्युनांमहादेवमंन्तःपर्शव्येनोग्रन्देवंवंनिष्ठुनांवसिष्ठहनुःशिङ्गीनिकोश्याभ्यांम् ॥२॥ उग्रं
लोहिंतेनमित्रꣳसौव्रंत्येनरुद्रन्दौर्व्रत्येनेन्द्रम्प्रक्रीडेनंमरुतोबलेनसाध्यान्प्रमुदां । भवस्यकण्ठ्यꣳ
रुद्रस्यांन्तःपार्श्व्यम्मंहादेवस्ययकृच्छर्वस्यंवनिष्ठुःपंशुपतेःपुरीतत् ॥ ३॥ लोमंभ्यःस्वाहालोमंभ्यः
स्वाहांत्वचेस्वाहांत्वचेस्वाहालोहिंतायस्वाहालोहिंतायस्वाहामेदोंभ्यःस्वाहामेदोंभ्यःस्वाहां ।
माꣳसेभ्यःस्वाहामाꣳसेभ्यःस्वाहास्नावंभ्यः स्वाहास्नावभ्यः स्वाहास्थभ्यःस्वाहास्थभ्यःस्वा
हांमज्जभ्यःस्वाहांमज्जभ्यःस्वाहां । रेतंसेस्वाहांपायवेस्वाहां ॥ ४ ॥ आयासायस्वाहांप्रायासाय
स्वाहांसंयासायस्वाहांवियासायस्वाहोंद्यासायस्वाहां । शुचेस्वाहाशोचंतेस्वाहाशोचंमानायस्वा

हाशोकायस्वाहा ॥ ५ ॥ तपसेस्वाहातप्यतेस्वाहातप्यमानायस्वाहातप्तायस्वाहाघर्मायस्वाहा ।
निष्कृत्यैस्वाहाप्रायश्चित्यैस्वाहाभेषजायस्वाहा ॥ ६॥ यमायस्वाहान्तकायस्वाहामृत्यवेस्वाहा ।
ब्रह्मणेस्वाहाब्रह्महत्यायैस्वाहाविश्वेभ्योदेवेभ्यस्वाहाद्यावापृथिवीभ्याᳬस्वाहा॥७॥ ॥ इतिसप्त
मोध्यायः॥ॐ वाजश्चमेप्रसवश्चमेप्रयतिश्चमेप्रसितिश्चमेधीतिश्चमेक्रतुश्चमेस्वरश्चमेश्लोकश्चमेश्रव
श्चमेश्रुतिश्चमेज्योतिश्चमेस्वश्चमेयज्ञेनकल्पन्ताम्॥१॥प्राणश्चमेपानश्चमेव्यानश्चमेसुश्चमेचित्तञ्चम
ऽआधीतञ्चमेवाक्चमेमनश्चमेचक्षुश्चमेश्रोत्रञ्चमेदक्षश्चमेबलञ्चमेयज्ञेनकल्पन्ताम् ॥२॥ ओजश्चमे
सहश्चमऽआत्माचमेतनूश्चमेशर्मचमेवर्मचमेङ्गानिचमेस्थीनिचमेपरूᳬषिचमेशरीराणिचमऽआ
युश्चमेजराचमेयज्ञेनकल्पन्ताम् ॥ ३ ॥ ज्यैष्ठ्यञ्चमऽआधिपत्यञ्चमेमन्युश्चमेभामश्चमेमश्चमेम्भ
श्चमेजेमाचमेमहिमाचमेवरिमाचमेप्रथिमाचमेवर्षिमाचमेद्राघिमाचमेवृद्धञ्चमेवृद्धिश्चमेयज्ञेनकल्प
न्ताम् ॥ ४ ॥ सत्यञ्चमेश्रद्धाचमेजगच्चमेधनञ्चमेविश्वञ्चमेमहश्चमेक्रीडाचमेमोदश्चमेजातञ्चमेज
निष्यमाणञ्चमेसूक्तञ्चमेसुकृतञ्चमेयज्ञेनकल्पन्ताम् ॥५॥ ऋतञ्चमेमृतञ्चमेयक्ष्मञ्चमेनामयच्चमेजी
वातुश्चमेदीर्घायुत्वञ्चमेनमित्रञ्चमेभयञ्चमेसुखञ्चमेशयनञ्चमेसूषाश्चमेसुदिनञ्चमेयज्ञेनकल्पन्ताम्
॥ ६ ॥ यन्ताचमेधर्त्ताचमेक्षेमश्चमेधृतिश्चमेविश्वञ्चमेमहश्चमेसंविच्चमेज्ञात्रञ्चमेसूश्चमेप्रसूश्चमेसी
रञ्चमेलयश्चमेयज्ञेनकल्पन्ताम् ॥ ७ ॥ शञ्चमेमयश्चमेप्रियञ्चमेनुकामश्चमेकामश्चमेसौमनस
श्चमेभगश्चमेद्रविणंचमेभद्रञ्चमेश्रेयश्चमेवसीयश्चमेयशश्चमेयज्ञेनकल्पन्ताम् ॥ ८ ॥ ऊर्क्चमे
सूनृताचमेपयश्चमेरसश्चमेघृतञ्चमेमधुचमेसग्धिश्चमेसपीतिश्चमेकृषिश्चमेवृष्टिश्चमेजैत्रञ्चमऽऔ
द्भिद्यञ्चमेयज्ञेनकल्पन्ताम् ॥ ९ ॥ रयिश्चमेरायश्चमेपुष्टञ्चमेपुष्टिश्चमेविभुचमेप्रभुचमेपूर्णञ्च
मेपूर्णतरञ्चमेकुयवञ्चमेक्षितञ्चमेनञ्चमेक्षुच्चमेयज्ञेनकल्पन्ताम् ॥ १० ॥ वित्तञ्चमेवेद्यञ्चमेभूतञ्च

मेभविष्यच्चमेसुगञ्चमेसुपथ्यञ्चमऽऋद्धञ्चमऽऋद्धिश्चमेक्लृप्तञ्चमेक्लृप्तिश्चमेमतिश्चमेसुमतिश्चमेयज्ञे
नकल्पन्ताम्॥११॥ व्रीहयश्चमेयवाश्चमेमाषाश्चमेतिलाश्चमेमुद्गाश्चमेखल्वाश्चमेप्रियङ्गवश्चमेणवश्च
मेश्यामाकाश्चमेनीवाराश्चमेगोधूमाश्चमेमसूराश्चमेयज्ञेनकल्पन्ताम् ॥ १२ ॥ अश्माचमेमृत्तिका
चमेगिरयश्चमेपर्वताश्चमेसिकताश्चमेवनस्पतयश्चमेहिरण्यञ्चमेयश्चमेश्यामञ्चमेलोहञ्चमेसीसञ्चमे
त्रपुचमेयज्ञेनकल्पताम् ॥ १३ ॥ अग्निश्चमऽआपश्चमेवीरुधश्चमऽओषधयश्चमेकृष्टपच्या
श्चमेकृष्टपच्याश्चमेग्राम्याश्चमेपशवऽआरण्याश्चमेवित्तञ्चमेवित्तिश्चमेभूतञ्चमेभूतिश्चमेयज्ञेनकल्प
न्ताम् ॥ १४ ॥ वसुचमेवसतिश्चमेकर्मचमेशक्तिश्चमेर्थश्चमऽएमश्चमऽइत्याचमेगतिश्चमेयज्ञे
नकल्पन्ताम्॥१५॥ अग्निश्चमऽइन्द्रश्चमेसोमश्चमऽइन्द्रश्चमेसविताचमऽइन्द्रश्चमेसरस्वतीचमऽ
इन्द्रश्चमेपूषाचमऽइन्द्रश्चमेबृहस्पतिश्चमऽइन्द्रश्चमेयज्ञेनकल्पन्ताम् ॥ १६ ॥ मित्रश्चमऽइन्द्रश्च
मेवरुणश्चमऽइन्द्रश्चमेधाताचमऽइन्द्रश्चमेत्वष्टाचमऽइन्द्रश्चमेमरुतश्चमऽइन्द्रश्चमेविश्वेचमेदेवाऽ
इन्द्रश्चमेयज्ञेनकल्पन्ताम् ॥ १७ ॥ पृथिवीचमऽइन्द्रश्चमेन्तरिक्षञ्चमऽइन्द्रश्चमेद्यौश्चमऽइन्द्रश्चमे
समाश्चमऽइन्द्रश्चमेनक्षत्राणिचमऽइन्द्रश्चमेदिशश्चमऽइन्द्रश्चमेयज्ञेनकल्पन्ताम् ॥१८॥ अꣳशुश्च
मेरश्मिश्चमेदाभ्यश्चमेधिपतिश्चमऽउपाꣳशुश्चमेन्तर्यामश्चमऽऐन्द्रवायवश्चमेमैत्रावरुणश्चमऽआ
श्विनश्चमेप्रतिप्रस्थानश्चमेशुक्रश्चमेमन्थीचमेयज्ञेनकल्पन्ताम्॥१९॥ आग्रयणश्चमेवैश्वदेवश्चमेध्रु
वश्चमेवैश्वानरश्चमऽऐन्द्राग्नश्चमेमहावैश्वदेवश्चमेमरुत्वतीयाश्चमेनिष्केवल्यश्चमेसावित्रश्चमेसारस्व
तश्चमेपात्नीवतश्चमेहारियोजनश्चमेयज्ञेनकल्पन्ताम्॥२०॥ स्रुचश्चमेचमसाश्चमेवायव्यानिचमे
द्रोणकलशश्चमेग्रावाणश्चमेधिषवणेचमेपूतभृच्चमऽआधवनीयश्चमेवेदिश्चमेबर्हिश्चमेवभृथश्चमेस्व
गाकारश्चमेयज्ञेनकल्पन्ताम् ॥२१॥ अग्निश्चमेघर्मश्चमेर्कश्चमेसूर्यश्चमेप्राणश्चमेश्वमेधश्चमेपृथिवी

चमेदितिश्चमेदितिश्चमेद्यौश्चमेङ्गुलयःशक्वरयोदिशश्चमेयज्ञेनकल्पन्ताम् ॥२२॥ व्रतञ्चमऽऋतवश्च
मेतपश्चमेसंवत्सरश्चमेहोरात्रेऽऊर्वष्ठीवेबृहद्रथन्तरेचमेयज्ञेनकल्पन्ताम् ॥२३॥ एकाचमेतिस्रश्चमे
तिस्रश्चमेपञ्चचमेपञ्चचमेसप्तचमेसप्तचमेनवचमेनवचमऽएकादशचमऽएकादशचमेत्रयोदशचमेत्र
योदशचमेपञ्चदशचमेपञ्चदशचमेसप्तदशचमेसप्तदशचमेनवदशचमेनवदशचमऽएकविꣳशतिश्चम
एकविꣳशतिश्चमेत्रयोविꣳशतिश्चमेत्रयोविꣳशतिश्चमेपञ्चविꣳशतिश्चमेपञ्चविꣳशतिश्चमेसप्तविꣳश
तिश्चमेसप्तविꣳशतिश्चमेनवविꣳशतिश्चमेनवविꣳशतिश्चमऽएकत्रिꣳशच्चमऽएकत्रिꣳशच्चमेत्रयस्त्रिꣳ
शच्चमेयज्ञेनकल्पन्ताम् ॥ २४ ॥ चतस्रश्चमेष्टौचमेष्टौचमेद्वादशचमेद्वादशचमेषोडशचमेषोडशच
मेविꣳशतिश्चमेविꣳशतिश्चमेचतुर्विꣳशतिश्चमेचतुर्विꣳशतिश्चमेष्टाविꣳशतिश्चमेष्टाविꣳशतिश्चमेद्वा
त्रिꣳशच्चमेद्वात्रिꣳशच्चमेषट्त्रिꣳशच्चमेषट्त्रिꣳशच्चमेचत्वारिꣳशच्चमेचत्वारिꣳशच्चमेचतुश्चत्वारिꣳश
च्चमेचतुश्चत्वारिꣳशच्चमेष्टाचत्वारिꣳशच्चमेयज्ञेनकल्पन्ताम् ॥ २५ ॥ त्र्यविश्चमेत्र्यवीचमेदित्यवा
ट्चमेदित्यौहीचमेपञ्चाविश्चमेपञ्चावीचमेत्रिवत्सश्चमेत्रिवत्साचमेतुर्यवाट्चमेतुर्यौहीचमेयज्ञेनकल्प
न्ताम् ॥२६॥ पष्ठवाट्चमेपष्ठौहीचमऽउक्षाचमेवशाचमऽऋषभश्चमेवेहच्चमेनड्वाँश्चमेधेनुश्चमेयज्ञेनक
ल्पन्ताम् ॥२७॥ वाजायस्वाहाप्रसवायस्वाहापिजायस्वाहाक्रतवेस्वाहावसवेस्वाहाहर्पतयेस्वाहा
ह्नेमुग्धायस्वाहामुग्धायवैनꣳशिनायस्वाहाविनꣳशिनऽआन्त्यायनायस्वाहान्त्यायभौवनायस्वा
हाभुवनस्यपतयेस्वाहाधिपतयेस्वाहाप्रजापतयेस्वाहा । इयन्तेराण्मित्राययन्तासियमनऽऊ
र्जेत्वावृष्ट्यैत्वाप्रजानान्त्वाधिपत्याय ॥२८॥ आयुर्यज्ञेनकल्पताम्प्राणोयज्ञेनकल्पताञ्चक्षुर्यज्ञेनक
ल्पताꣳश्रोत्रंयज्ञेनकल्पतांवाग्यज्ञेनकल्पताम्मनोयज्ञेनकल्पतामात्मायज्ञेनकल्पताम्ब्रह्मायज्ञे
नकल्पताञ्ज्योतिर्यज्ञेनकल्पताꣳस्वर्यज्ञेनकल्पताम्पृष्ठंयज्ञेनकल्पतांयज्ञोयज्ञेनकल्पताम् । स्तोमं

श्चयजुश्चऽऋक्चसामचबृहच्चरथन्तरञ्च। स्वर्देवाऽअगन्मामृताऽअभूमप्रजापतेःप्रजाऽअभूमवेट्
स्वाहा ॥ २९ ॥ इत्यष्टमोध्यायः ॥ ॐ ऋचंवाचम्प्रपद्येमनोयजुःप्रपद्येसामप्राणम्प्रपद्येचक्षुःश्रो
त्रम्प्रपद्ये। वागोजःसहोजौमयिप्राणापानौ ॥ १ ॥ यन्मेछिद्रञ्चक्षुषोहृदयस्यमनसोवातितृण
म्बृहस्पतिर्मेतद्दधातु। शन्नोभवतुभुवनस्ययस्पतिः ॥२॥ ॐ भूर्भुवःस्वः।तत्सवितु० ॥३॥
कयानश्चित्रऽआभुवदूतीसदावृधःसखा। कयाशचिष्ठयावृता॥४॥कस्त्वासत्योमदानाम्मंहिष्ठो
मत्सदन्धसः। दृढाचिदारुजेवसु ॥ ५ ॥ अभीषुणःसखीनामविताजरितॄणाम्। शतम्भवा
स्यूतिभिः ॥ ६ ॥ कयात्वन्नऽऊत्याभिप्रमन्दसेवृषन्। कयास्तोतृभ्यऽआभर ॥७॥ इन्द्रोवि
श्वस्यराजति। शन्नोऽअस्तुद्विपदेशञ्चतुष्पदे ॥८॥ शन्नोमित्रःशंवरुणःशन्नोभवत्वर्यमा। शन्न
इन्द्रोबृहस्पतिःशन्नोविष्णुरुरुक्रमः ॥ ९ ॥ शन्नोवातःपवताँशन्नस्तपतुसूर्यः। शन्नःकनि
क्रदद्देवःपर्जन्योऽअभिवर्षतु ॥ १० ॥ अहानिशम्भवन्तुनःशंरात्रीःप्रतिधीयताम्। शन्नऽइन्द्रा
ग्नीभवतामवोभिःशन्नऽइन्द्रावरुणारातहव्या। शन्नऽइन्द्रापूषणावाजसातौशमिन्द्रासोमासुवि
तायशंयोः ॥ ११ ॥ शन्नोदेवी० ॥ १२ ॥ स्योनापृथिविनोभवानृक्षरानिवेशनी। यच्छा
नःशर्मसप्रथाः ॥ १३ ॥ आपोहिष्ठा० ॥ १४ ॥ योवःशिवत० ॥ १५ ॥ तस्माऽअरङ्ग०
॥ १६ ॥ द्यौःशान्ति०सामाशान्तिरेधि ॥१७॥दृतेदृंहमामित्रस्यमाचक्षुषासर्वाणिभूतानिसमी
क्षन्ताम्। मित्रस्याहञ्चक्षुषासर्वाणिभूतानिसमीक्षे। मित्रस्यचक्षुषासमीक्षामहे ॥ १८ ॥ दृते
दृंहमा। ज्योक्तेसन्दृशिजीव्यासञ्ज्योक्तेसन्दृशिजीव्यासम् ॥ १९ ॥ नमस्तेहरसेशोचिषेन
मस्तेऽअस्त्वर्चिषे। अन्याँस्तेऽअस्मत्तपन्तुहेतयःपावकोऽअस्मभ्यंशिवोभव ॥ २० ॥ न
मस्तेऽअस्तुविद्युतेनमस्तेस्तनयित्नवे। नमस्तेभगवन्नस्तुयतःस्वःसमीहसे ॥ २१ ॥ यतोय

तस्समीहसेततोनोअभयङ्कुरु । शन्नःकुरुप्रजाभ्योभयन्नःपशुभ्यः ॥ २२ ॥ सुमित्रि० द्विष्मः ॥ २३ ॥ तच्चक्षुर्देवहितं० शरदःशतात् ॥ २४ ॥ इतिशांत्यध्यायः ॥ ॐ स्वस्तिनइन्द्रो० ॥ १ ॥ ॐ पयःपृथिव्याम्० ॥ २ ॥ ॐ सद्योजातंप्रपद्यामिसद्योजातायवैनमोनमः । भवेभवेनातिभवेभवस्वमांभवोद्भवायनमः ॥ ३ ॥ वामदेवायनमोज्येष्ठायनमःश्रेष्ठायनमोरुद्रायनमःकालायनमःकलविकरणायनमोबलविकरणायनमोबलायनमोबलप्रमथनायनमःसर्वभूतदमनायनमोमनोन्मनायनमः ॥ ४ ॥ अघोरेभ्योथघोरेभ्योघोरघोरतरेभ्यः । सर्वेभ्यःसर्वशर्वेभ्योनमस्तेअस्तुरुद्ररूपेभ्यः ॥ ५ ॥ तत्पुरुषायविद्महेमहादेवायधीमहि । तन्नोरुद्रःप्रचोदयात् ॥ ६ ॥ ईशानःसर्वविद्यानामीश्वरःसर्वभूतानांब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्माशिवोमेअस्तुसदाशिवोम् ॥ ७ ॥ ॐ सर्वेषांवाऽएषवेदानाꣳरसोयत्सामसर्वेषामेवैनमेतद्वेदानाꣳरसेनाभिषिञ्चति ॥ ८ ॥ ॐ शांतिःशांतिःसुशांतिर्भवतु । सर्वारिष्टशांतिर्भवतु ॥ इतिस्वस्तिप्रार्थनामंत्राध्यायः ॥ **इतिरुद्रः** ॥ ॥ ११ ॥ **अथगणेशाथर्वशीर्षम्** ॥ श्रीगणेशायनमः ॥ ॐ नमस्तेगणपतये । त्वमेवप्रत्यक्षंतत्त्वमसि । त्वमेवकेवलंकर्त्तासि । त्वमेवकेवलंधर्त्तासि । त्वमेवकेवलंहर्त्तासि । त्वमेवसर्वंखल्विदंब्रह्मासि । त्वंसाक्षादात्मासिनित्यं । ऋतंवच्मि । सत्यंवच्मि । अवत्वंमां । अववक्तारं । अवश्रोतारं । अवदातारं । अवधातारं । अवानूचानमवशिष्यं । अवपश्चात्तात् । अवपुरस्तात् । अवोत्तरात्तात् । अवदक्षिणात्तात् । अवचोर्ध्वात्तात् । अवाधरात्तात् । सर्वतोमांपाहिपाहिसमंतात् । त्वंवाङ्मयस्त्वंचिन्मयः । त्वमानंदमयस्त्वंब्रह्ममयः । त्वंसच्चिदानंदाद्वितीयोसि ॥ त्वंप्रत्यक्षंब्रह्मासि । त्वंज्ञानमयोविज्ञानमयोसि । सर्वंजगदिदंत्वत्तोजायते । सर्वंजगदिदंत्वत्तस्तिष्ठति । सर्वंजगदिदंत्वयिलयमेष्यति । सर्वंजगदिदंत्वयिप्रत्येति ।

 त्वंभूमिरापोऽनलोऽनिलोनभः। त्वंचत्वारिवाक्पदानि। त्वंगुणत्रयातीतः।त्वमवस्थात्रयातीतः।
 त्वंदेहत्रयातीतः। त्वंकालत्रयातीतः। त्वंमूलाधारस्थितोसिनित्यं। त्वंशक्तित्रयात्मकः । त्वां
योगिनोध्यायंतिनित्यं । त्वंब्रह्मात्वंविष्णुस्त्वंरुद्रस्त्वमिन्द्रस्त्वमग्निस्त्वंवायुस्त्वंसूर्यस्त्वंचंद्रमा
स्त्वंब्रह्मभूर्भुवःस्वरोम्। गणादीन्पूर्वमुच्चार्यवर्णादींस्तदनंतरं। अनुस्वारःपरतरः । अर्धेन्दुल
सितं। तारेणरुद्धं। एतत्तवमनुस्वरं। गकारःपूर्वरूपम्। अकारोमध्यमरूपं। अनुस्वारश्चांत्य
रूपं। बिन्दुरुत्तररूपं। नादःसंधानं। सꣳहितासंधिः। सैषागणेशविद्या । गणकऋषिः ।
निचृद्गायत्रीछंदः। गणपतिर्देवता। ॐ गंगणपतयेनमः॥ एकदंतायविद्महेवक्रतुंडायधीमहि ।
तन्नोदन्तीप्रचोदयात्॥ एकदंतंचतुर्हस्तंपाशमंकुशधारिणं। रदंचवरदंहस्तैर्बिभ्राणंमूषकध्वजं॥
रक्तंलंबोदरंशूर्पकर्णकंरक्तवाससं। रक्तगंधानुलिप्तांगंरक्तपुष्पैःसुपूजितं ॥ भक्तानुकंपिनंदेवंजग

त्कारणमच्युतं। आविर्भूतंचसृष्ट्यादौप्रकृतेःपुरुषात्परं॥एवंध्यायतियोनित्यंसयोगीयोगीनांवरः॥
नमोव्रातपतयेनमोगणपतयेनमःप्रमथपतयेनमस्तेस्तुलंबोदरायैकदंतायविघ्ननाशिनेशिवसुताय
वरदमूर्तयेनमः॥ एतदथर्वशीर्षंयोधीते। सब्रह्मभूयायकल्पते।ससर्वविघ्नैर्नबाध्यते।ससर्वत्रसुख
मेधते। सपंचमहापापात्प्रमुच्यते। सायमधीयानोदिवसकृतंपापंनाशयति।प्रातरधीयानोरात्रिकृ
तंपापंनाशयति। सायंप्रातःप्रयुंजानोअपापोभवति। सर्वत्राधीयानोपविघ्नोभवति । धर्ममर्थं
कामंमोक्षंचविंदति। इदमथर्वशीर्षमशिष्यायनदेयं। योयदिमोहाद्दास्यति । सपापीयान्भव-
ति। सहस्रावर्तनाद्यंयंकाममधीते। तंतमनेनसाधयेत्। अनेनगणपतिमभिषिंचति । सवा
ग्मीभवति। चतुर्थ्यामनश्नञ्जपति। सविद्यावान्भवति। इत्यथर्वणवाक्यं। ब्रह्माद्यावरणंवि
द्यान्नबिभेतिकदाचनेति। योदूर्वांकुरैर्यजति। सवैश्रवणोपमोभवति। योलाजैर्यजति।

सयशोवान्भवति । समेधावान्भवति । योमोदकसहस्रेणयजति । सवांछितमवाप्नोति ।
यःसाज्यसमिद्भिर्यजति । ससर्वंलभतेससर्वंलभते । अष्टौब्राह्मणान्सम्यग्ग्राहयित्वा ।
सूर्यवर्चस्वीभवति । सूर्यग्रहेमहानद्यांप्रतिमासंनिधौवाजप्त्वा । सिद्धमंत्रोभवति । महावि
घ्नात्प्रमुच्यते । महादोषात्प्रमुच्यते । महाप्रत्यवायात्प्रमुच्यते । ससर्वविद्भवतिससर्वविद्भव
ति । यएवंवेद । इत्युपनिषत् ॥ **इतिगणेशाथर्वशीर्षम्** ॥ ॥ १२ ॥ **अथनाराय
णाथर्वशीर्षम्** ॥ श्रीगणेशायनमः ॥ अथपुरुषोहवैनारायणोऽकामयतप्रजाःसृजेयेति ।
नारायणात्प्राणोजायते । मनःसर्वेन्द्रियाणिच । खंवायुर्ज्योतिरापःपृथिवीविश्वस्यधारि
णी । नारायणाद्ब्रह्माजायते । नारायणाद्विष्णुर्जायते । नारायणाद्रुद्रोजायते । नारायणादि
न्द्रोजायते । नारायणात्प्रजापतिःप्रजायते । नारायणाद्द्वादशादित्यारुद्रावसवःसर्वाणिछंदांसि ।

नारायणाद्देवाःसमुत्पद्यंते । नारायणात्प्रवर्तंते । नारायणेप्रलीयंते । अथादित्योनारायणः । ब्रह्मा
नारायणः । शिवश्चनारायणः । शक्रश्चनारायणः । कालश्चनारायणः । दिशश्चनारायणः। ऊर्ध्वंच
नारायणः । अधश्चनारायणः । अंतर्बहिश्चनारायणः । नारायणएवेदꣳसर्वंयद्भूतंयच्चभाव्यं ।
निष्कलोनिरंजनोनिर्विकल्पोनिराख्यातःशुद्धोदेवएकोनारायणोनद्वितीयोस्तिकश्चित् । यएवंवेद ।
सविष्णुरेवभवतिसविष्णुरेवभवति । ॐ इत्यग्रेव्याहरेत् । नमइतिपश्चात् । नारायणायेत्युपरिष्टा
त् । ॐ इत्येकाक्षरं । नमइतिद्वेअक्षरे । नारायणायेतिपंचाक्षराणि । एतद्वैनारायणस्याष्टाक्षरं
पदं । योहवैनारायणस्याष्टाक्षरंपदमध्येति । अनुपब्रतःसर्वमायुरेति । विंदतेप्रजांरायस्पोषंगौप
त्यंततोमृतमश्नुतेततोमृतमश्नुतइति । प्रत्यगानंदंब्रह्मपुरुषंप्रणवस्वरूपं । अकारउकारोमकार
इति । तानेकधासंयोज्यतदेवतदोमिति । यमुक्त्वामुच्यतेयोगीजन्मसंसारबंधनात् । ॐ नमो

नारायणायेतिमंत्रोपासकोवैकुंठंभुवनंगच्छति । तदिदंपरमंपुंडरीकंविज्ञानघनं । तस्मात्तडिदा
भमात्रं । ब्रह्मण्योदेवकीपुत्रोब्रह्मण्योमधुसूदनः । सर्वभूतस्थमेकंवैनारायणं । कारणरूपंपरब्र
ह्मकं ॥ एतदथर्वशीर्षंयोधीते । सायमधीयानोदिवसकृतंपापंनाशयति । प्रातरधीयानोरात्रिकृ
तंपापंनाशयति । सायंप्रातःप्रयुंजानोअपापोभवति । मध्यंदिनमादित्याभिमुखोधीयानःसद्यः
पंचमहापातकोपपातकेभ्योमुच्यते । सर्ववेदपारायणपुण्यंलभते । श्रीनारायणसायुज्यमवाप्नो
ति । यएवंवेद ॥ इत्युपनिषत् ॥ **इतिनारायणाथर्वशीर्षम् ॥ ॥ १३ ॥ अथलक्ष्मीसूक्तम् ॥**
हरिः ॐ हिरंण्यवर्णांहरिंणींसुवर्णरजतस्रंजां । चंद्रांहिरण्मयींलक्ष्मींजातवेदोममावह ॥ १ ॥
तांमऽआवंहजातवेदोलक्ष्मीमनंपगामिनीं । यस्यांहिरंण्यंविंदेयंगामश्वंपुरुंषानहं ॥ २ ॥ अ
श्वपूर्वांरंथमध्यांहस्तिनादप्रमोदिनीं । श्रियंदेवीमुपंव्हयेश्रीर्मादेवीर्जुंषतां ॥ ३ ॥ कांसोस्मि
तांहिरंण्यप्राकारामार्द्रांज्वलंतींतृप्तांतर्पयंतीं । पद्मेस्थितांपद्मवर्णांतामिहोपंव्हयेश्रियं ॥ ४ ॥
चंद्रांप्रभासांयशसाज्वलंतींश्रियंलोकेदेवजुंष्टामुदाराम् । तांपद्मनेमिंशरणमहंप्रपद्येअलक्ष्मीर्मेन
श्यतांत्वांवृणोमि ॥ ५ ॥ आदित्यवर्णेतपसोधिजातोवनस्पतिस्तववृक्षोथबिल्वः । तस्यफला
नितपसानुदंतुमायांतरायाश्चबाह्याअलक्ष्मीः ॥६॥ उपैतुमांदेवसखःकीर्तिश्चमणिनासह । प्रादु
र्भूतोसुंराष्ट्रेस्मिन्कीर्तिंवृद्धिंददातुमे ॥ ७ ॥ क्षुत्पिपासामलाज्येष्ठाअलक्ष्मीर्नाशयाम्यहं । अभू
तिमसंमृद्धिंचसर्वांनिर्णुदमेगृंहात् ॥ ८ ॥ गंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीं । ईश्वरींसर्व
भूतानांतामिहोपंव्हयेश्रियं ॥ ९ ॥ मनंसःकाममाकूतिंवाचःसत्यमंशीमहि । पशूनांरूपमन्नस्य
मयिश्रीःश्रयतांयशः ॥ १० ॥ कर्दमेनप्रजाभूतामयिसंभ्रमकर्दम । श्रियंवासयमेकुलेमातरंप
द्ममालिनीं ॥ ११ ॥ आपंःस्रजंतुस्निग्धांनिचिक्लीतवसमेगृहे । नीचंदेवींमातरंश्रियंवासयमेकु

ले ॥ १२ ॥ आर्द्रांपुष्करिंणींपुष्टिंसुवर्णांहेमृमालिंनीं । सूर्यांहिरण्मयींलक्ष्मींजातवेदोमुमावह ॥ १३ ॥ आर्द्रांयःकरिंणींयष्टींपिंगलांपद्ममालिंनीं । चंद्रांहिरण्मयींलक्ष्मींजातवेदोमुमावह ॥१४॥ तामृऽआवह जातवेदोलुक्ष्मीमलपगामिनीं । यस्यांहिरंण्यंप्रभूतिंगावोदास्योश्वान्विंदेयंपुरुंषानुहं ॥ १५ ॥ यःशुचिःप्रयंतोभूत्वाजुहुयादाज्यमन्वंहं । श्रियंःपंचदशर्चंचश्रीकामःसततंजंपेत् ॥ १६ ॥ सरसिजनिलयेसरोजहस्तेधवलतरेशुभगंधमाल्यशोभे । भगवतिहरिवल्लभेमनोज्ञेत्रिभुवनभूतिकरिप्रसीदमह्यं ॥१७॥ धनमग्निर्धनंवायुर्धनंसूर्योधनंवसुः । धनमिन्द्रोबृहस्पतिर्वरुणंधनमुच्यते ॥ १८ ॥ वैनतेयसोमंपिबसोमंपिबतुवृत्रहा । सोमंधनस्यसोमिनोमह्यंददातुसोमिनः ॥ १९ ॥ नक्रोधोनचमात्सर्यंनलोभोनाशुभामतिः । भवंतिकृतपुण्यानांभक्तानांश्रीसूक्तंजपेत् ॥ २० ॥ पद्माननेपद्मऊरुपद्माक्षिपद्मसंभवे । तन्मेभजसिपद्माक्षियेनसौख्यंलभाम्यहं ॥ २१ ॥ विष्णुपत्नींक्षमांदेवींमाधवींमाधवप्रियां । विष्णुप्रियसखींदेवींनमाम्यच्युतवल्लभां ॥ २२ ॥ महालक्ष्मीचविद्महेविष्णुपत्नीचधीमहि । तन्नोलक्ष्मीःप्रचोदयात् ॥२३॥ पद्माननेपद्मिनिपद्मपत्रेपद्मप्रियेपद्मदलायताक्षि । विश्वप्रियेविश्वमनोनुकूलेत्वत्पादपद्मंमयिसंनिधत्स्व ॥ २४ ॥ आनंदःकर्दमःश्रीदश्चिक्लीतइतिविश्रुताः । ऋषयःश्रियपुत्राश्चमयिश्रीर्देविदेवताः ॥ २५ ॥ ऋणरोगादिदारिद्र्यंपापंचअपमृत्यवः । भयशोकमनस्तापानश्यंतुममसर्वदा ॥ २६ ॥ श्रीवर्चस्वमायुष्यमारोग्यमाविधात्पवमानंमहीयते । धान्यंधनंपशुंबहुपुत्रलाभंशतसंवत्सरंदीर्घमायुः ॥ २७ ॥ **इतिलक्ष्मीसूक्तम्** ॥ ॥ १४ ॥ **अथपुष्पांजलिमंत्राः** ॥ श्रीगणेशायनमः ॥ ॐ गुणानांन्त्वा० ॥ १ ॥ ॐ श्रीश्चंतेलुक्ष्मीश्च० ॥ २ ॥ ॐ अम्बेऽअम्बिकेम्बालिकेनमांनयतिकश्चन । ससंस्त्यश्वकःसुभद्रिकाङ्काम्पीलवासिनींम् ॥ ३ ॥ ॐ तन्तंऽएतमनु

जोषंभराम्येषनेत्वदपचेतयाताऽअग्नेःप्रियम्पाथोपीतम् ॥ ४ ॥ ॐ सꣳस्त्रवभागास्थेषाबृह
न्तं÷प्रस्तरेष्ठाःपरिधेयाश्चदेवाः ॥ ५ ॥ ॐ मूर्धानन्दिवोऽअरतिम्पृथिव्यावैश्वानरमृतऽआ
जातमग्निम् । कविꣳसम्राजमतिथिञ्जनानामासन्नापात्रञ्जनयन्तदेवाः ॥ ६ ॥ ॐ प्रोह्यमाणꣳ
सोमऽआगतोवरुणऽआसन्द्यामासन्नोग्निराग्नीध्रऽइन्द्रोहविर्धानेथर्वोपावह्रियमाणोविश्वेदेवाः ॥
॥७॥ ॐ विश्वेदेवाऽअꣳशुषुन्युप्तोविष्णुराप्रीतपाऽआप्यायमानोयमःसूयमानोविष्णु÷सम्भ्रि
यमाणोवायुःपूयमानꣳशुक्रःपूतःशुक्रःक्षीरश्रीर्मन्थीसक्तुश्रीर्विश्वेदेवाः ॥ ८ ॥ ॐ पितेवैधिसू
नवऽआसुशेवास्वावेशातन्वासंविशस्वाश्विनाध्वर्यूस्वादयत्वामिहत्वा ॥ ९ ॥ ॐ पृथिव्याः
पुरीषमस्यप्सोनामतान्त्वाविश्वेऽअभिगृणन्तुदेवाः ॥ १० ॥ ॐ षोडशीस्तोमऽओजोद्रवि
णञ्चतुश्चत्वारिꣳशस्तोमोवर्चोद्रविणम् । अग्नेःपुरीषमस्यप्सो० ॥ ११ ॥ ॐ समिद्धेऽअग्नाव

धिमामहानऽउक्थपत्रऽईड्योगृभीतः । तप्तङ्घर्मम्परिगृह्यायजन्तोर्जायद्यज्ञमयजन्तदेवाः ॥
॥ १२ ॥ यस्येमाःप्रदिशोयस्यबाहूकस्मैदेवायहविषाविधेम ॥ १३ ॥ ॐ यऽआत्मदाबलदाय
स्यविश्वऽउपासतेप्रशिषंयस्यदेवाः ॥ १४ ॥ ॐ अनागास्त्वन्नोऽअदितिꣳकृगोतुक्षत्रन्नोअश्वो
वनताꣳहविष्मान् ॥१५॥ ॐ इमानुकम्भुवनासीषधामेन्द्रश्चविश्वेचदेवाः ॥१६॥ ॐ बृहस्पते
सवितर्बोधयैनꣳसꣳशितञ्चित्सन्तराꣳसꣳशिशाधि । वर्धयैनम्महतेसौभगायविश्वऽएनमनुमद
न्तुदेवाः ॥ १७ ॥ ॐ प्रजापतेस्तपसावावृधानःसद्योजातोदधिषेयज्ञमग्ने । स्वाहाकृतेन
हविषापुरोगायाहिसाध्याहविरदन्तुदेवाः ॥ १८ ॥ ॐ सद्योजातोव्यमिमीतयज्ञमग्निर्देवाना
मभवत्पुरोगाः । अस्यहोतु÷प्रदिश्यृतस्यवाचिस्वाहाकृतꣳहविरदन्तुदेवाः ॥ १९ ॥ ॐ अ
स्मेरुद्रामेहनापर्वतासोवृत्रहत्येभरहूतौसजोषाः । यःशꣳसतेस्तुवतेधायिपज्रऽइन्द्रज्येष्ठाऽ

अस्मा२ ॥ ऽअंवन्तुदेवाः ॥ २० ॥ ॐ नहिस्पशमविंदन्नन्यमस्माद्वैश्वानरात्पुरऽएतारमग्नेः । एमेनमवृधन्नमृताऽअमर्त्यंवैश्वानरंक्षैत्रजित्यायदेवाः ॥ २१ ॥ ॐ यज्ञेनयज्ञ० ॥ २२ ॥ ॐ राराजाधिराजाय०महाराजायनमः॥२३॥ ॐ स्वस्ति०सभासदइति ॥२४॥ ॐ विश्वतश्चक्षु० ॥ ॥ २५ ॥ इतिपुष्पांजलिमंत्राः ॥

॥ १९ ॥ **अथपार्थिवपूजा** ॥ श्रीगणेशायनमः ॥

कृतस्नानःशुचिर्भूत्वाधृतत्रिपुंड्ररुद्राक्षमालःकृतसंध्यावंदनाद्यावश्यकक्रियःप्रयतोब्रह्मचारीशुक्लवासाउदीचींदिशंगत्वाशुचौदेशेपाषाणवेणुकीटास्थिवालुकादिदोषरहितांमृदंदृष्ट्वा ॥ तत्रगंधाद्युपचारैर्भूमिंसंपूज्यनत्वा ॥ ईशानकोणगतांमृदंशस्त्रेणोत्कीर्याष्टांगुलांमृदमपाकृष्य ॥ उद्धृतासिवराहेणकृष्णेनशतबाहुना । मृत्तिकेत्वांचगृह्णामिशिवपूजनहेतवे ॥ इतिशुद्धांतमृंदमादायगृहआगत्यशुचिस्थलेतांचस्थापयेत् ॥ ततःपृथ्वित्वयेत्युदङ्मुखआसनउपविश्य ॥ अपसर्पंतित्यादिनागौरसर्षपांश्चतुर्दिक्षुविकिरेत् ॥ सुमुखश्चेत्यादिश्लोकान्पठित्वा ॥ अद्येत्यादि० ॥ एवंग्रहगुणविशेषणविशिष्टायांशुभपुण्यतिथौममात्मनःश्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थंममसकलमनोरथसिद्धिदुरितक्षयद्वाराश्रीभवानीशंकरप्रीत्यर्थममुकसंख्याकपार्थिवलिंगानांपूजनंतंत्रेणपृथग्वाकरिष्ये ॥ इतिसंकल्प्य ॥ आदौनिर्विघ्नतासिध्यर्थंगणेशंस्मृत्वा ॥ ॐ सद्योजातंप्रपद्यामि० ॥ इतिमृदश्चूर्णंकुर्यात् ॥ ॐ वामदेवाय० ॥ इतितस्यांजलसेचनं ॥ ॐ अघोरेभ्यो० ॥ इतिसंयोजनं ॥ ॐ तत्पुरुषाय० ॥ इतिपिंडीकरणं ॥ ॐ ईशानःसर्वविद्यानां० ॥ इतियथोक्तमेखलंलिंगंलिंगानिवाविधाय ॥ समस्ताघनाशिनेनमइतिशिरसानियम्य ॥ पूतेवामपाणौवेदिकायांवाताम्रपात्रेबिल्वपत्रंनिधाय ॥ तदुपरिसाक्षतपुष्पंलिंगंसंस्थाप्यप्राणप्रतिष्ठांकुर्यात् ॥ अस्यश्रीप्राणप्रतिष्ठामंत्रस्यब्रह्मविष्णुरुद्राऋषयः । ऋग्यजुःसामाथर्वाणिछंदांसि । क्रियाम

यवपुः । प्राणाख्यादेवता । आंबीजम् । ह्रींशक्तिः । क्रौंकीलम् । पार्थिवलिंगेप्राणप्रतिष्ठापन
वि० ॥ ॐ आंह्रींक्रोंअंयंरंलंवंशंषंसंहंक्षंअःक्रोंह्रींआं । अस्मिन्लिंगेशिवस्यप्राणाइहप्राणाः ॥
ॐ आंह्रींक्रोंअंयंरंलंवंशंषंसंहंक्षंअःक्रोंह्रींआं । अस्मिंल्लिंगेशिवस्यजीवइहस्थितः॥ ॐ आंह्रीं
क्रोंअंयंरंलंवंशंषंसंहंक्षंअःक्रोंह्रींआं । अस्मिंल्लिंगेशिवस्यसर्वेंद्रियाणिवाङ्मनस्त्वक्चक्षुःश्रोत्र
जिव्हाघ्राणपाणिपादपायूपस्थानीहागत्यसुखंचिरंतिष्ठंतुस्वाहा॥ ॐ भूर्भुवःस्वःशिवायनमः । शि
वेहागच्छेहतिष्ठममपूजांगृहाणेतिप्राणप्रतिष्ठांकुर्यात् ॥ लिंगानांबहुत्वेप्राणप्रतिष्ठापृथक् ॥ पूज
नंतंत्रेणपृथग्वा ॥ ततःसहपुष्पोदकेनलिंगेदेवमाह्वयेत् ॥ ॐ भूःपुरुषमावाहयामि ॥ ॐ भुवः
पुरुषमावा० ॥ ॐ स्वःपुरुषमा० ॥ ॐ भूर्भुवःस्वःपुरुषमा० ॥ ॐ आयातुभगवान्महादेवः ॥
इत्यावाहयेत् ॥ स्वामिन्सर्वजगन्नाथयावत्पूजावसानकं । तावत्त्वंप्रीतिभावेनलिंगेस्मिन्संनिधिं
कुरु ॥ इतिप्रार्थ्य ॥ स्ववामभागेजलपूर्णकलशंस्थापयेत् ॥ सामग्रींदक्षिणभागे ॥ तत्वांयामि
ब्रह्मणेतिकलशेवरुणमावाह्यसंपूजयेत् ॥ कलशस्यमुखे० आयांतुशिवपूजार्थंदुरितक्षयकारकाः ॥
इतिकलशेतीर्थान्यावाह्य ॥ ॐ तत्पुरुषाय० ॥ इतितज्जलेनपूजासंभारांश्चप्रोक्ष्य॥ अथध्यानं ॥
ध्यायेनित्यंमहेशं० ॥ १ ॥ दक्षोत्संगनिषण्णकुंजरमुखंप्रेम्णाकरेणस्पृशन्वामोरूत्थितवल्लभां
कललितस्कंदंपरेणालभन् । इष्टाभीतिमनोहरंकरयुगंबिभ्रत्प्रसन्नाननोभूयान्नःशरदिंदुसुंदरतनुः
श्रेयस्करःशंकरः ॥ २ ॥ आत्मानंरुद्ररूपंध्यात्वामनःकल्पितैर्गंधादिभिरभ्यर्च्यवामनासापुटा
ध्वनामनसिस्थितंशिवंपुष्पप्रक्षेपेणलिंगआगतंविभाव्यपूजयेत् ॥ ॐ सद्योजातंप्रपद्यामिसद्यो
जातायवैनमोनमः । आसनंसमर्पयामि ॥ ॐ योरुद्रोयोअग्नौयोअप्सुयओषधीषुयोरुद्रोविश्वा
भुवनाविवेशतस्मैरुद्रायनमोअस्तु ॥ इतिपाद्यपात्रमभिमंत्र्यप्रक्षाल्य । तिरःपवित्रमपआनीय ।

पुनस्तेनैवापोभिमंत्र्यसहपवित्रेणादित्यंदर्शयित्वा॥ॐ भवेभवेनातिंभवेभवस्वमां ॥ पाद्यंस० ॥ पुनःपूर्ववदर्घ्यपात्रमभिमंत्र्यापआनीयाभिमंत्र्यसूर्यायदर्शयित्वा । ॐ भवोद्भवायनमः ॥ अर्घ्यंस० ॥ पुनःपूर्ववदाचमनपात्राभिमंत्रणादिकृत्वा ॥ ॐ वामदेवायनमः ॥ आचमनीयंस० ॥ ॐ ज्येष्ठायनमः ॥ मधुपर्कंस० ॥ ॐ पयःपृथिव्यां० ॥ पयःस्नानंस० ॥ [पंचामृतस्नानेशुद्धोदकाचमनीयगंधाक्षतपुष्पाणिसर्वत्र] ॐ दधिक्राव्णो० ॥ दधिस्नानंस०॥ ॐ घृतम्मिमिक्षे०॥ घृतस्नानंस० ॥ ॐ मधुवाता० ॥ ३ ॥ मधुस्नानंस० ॥ ॐ अपा॒ꣳरसं० ॥ शर्करास्नानंस० ॥ आपोहिष्ठेतितृचेनशुद्धोदकस्नानंस० । आचमनीयंस० । गंधाक्षतपुष्पबिल्वपत्रसमर्पणादिसंक्षिप्तांपूजांकृत्वोत्तरेनिर्माल्यंविसृज्यगंधाक्षतपुष्पबिल्वदलैश्चपुनरभ्यर्च्य सांगेनरुद्रेणाभिषेकंकृत्वाशुद्धोदकमाचमनीयंचदत्वादेवंतर्पयेत् ॥ तद्यथा ॥ ॐ भवंदेवंतर्पयामि॥ ॐ शिवंदेवंत० ॥

ॐ ईशानंदेवंत० ॥ ॐ पशुपतिंदेवंत० ॥ ॐ रुद्रंदेवंत० ॥ ॐ उग्रंदेवंत० ॥ ॐ भीमंदेवंत० ॥ ॐ महांतंदेवंतर्पयामि ॥ इतितर्पयित्वा ॥ ॐ श्रेष्ठायनमः ॥ वस्त्रंस० ॥ ॐ रुद्रायनमः ॥ उपवीतंस० ॥ ॐ कालायनमः ॥ गंधंसमर्पयामि ॥ ॐ कलविकरणायनमः ॥ अक्षतान्स० ॥ ॐ बलविकरणायनमः ॥ बिल्पत्रादिधत्तूरादिपुष्पाणिस० ॥ ॐ बलायनमः ॥ धूपंसम० ॥ ॐ बलप्रमथनायनमः ॥ दीपंदर्शयामि ॥ चतुरस्त्रमंडलोपरिनैवेद्यपात्रंनिधाय । नैवेद्यंमूलेनप्रोक्ष्य । अमृतोपस्तरणमसीतिपूर्वाचमनीयंदत्वा । प्राणापानव्यानोदानसमानेति ॐ सर्वभूतदमनायनमः ॥ नैवेद्यंस० ॥ मध्येपानीयंदत्वामुहूर्तमासीनोहविरुद्वासयामीतिनैवेद्यमुद्वास्य । ॐ अमृतापिधानमसीतिउत्तरापोशनंदत्वा ॥ ॐ मनोन्मनायनमः ॥ आचमनीयंस० ॥ ॐ शंभवेनमः ॥ तांबूलंस० ॥ ॐ शंभवेनमः ॥ दक्षिणांसम० ॥ ॐ शंभवेनमः ॥ नी

राजनंसम० ॥ ॐ शंभवेनमः ॥ प्रदक्षिणांसम० ॥ ॐ शंभवेनमः ॥ मंत्रपुष्पांजलिंसम० ॥ ॐ शंभवेनमः ॥ नमस्कारान्सर्पयामि ॥ ततः ॐ भवायक्षितिमूर्तयेनमः ॥ १ ॥ ॐ शर्वायजलमूर्तये० । २ । ॐ ईशानायाग्निमूर्तये० । ३ । ॐ पशुपतयेवायुमूर्तये० । ४ । ॐ रुद्रायाकाशमूर्तये० । ५ । ॐ उग्रायजमानमूर्तये० । ६ । ॐ भीमायसोममूर्तये० । ७ । ॐ महतेसूर्यमूर्तयेनमः । ८ । इतिलिंगस्याष्टदिक्षुप्राचीमारभ्याक्षतान्क्षिपेत् ॥ अथप्रार्थना ॥ नमः ॐ काररूपायवेदरूपायतेनमः । अलिंगलिंगरूपायविश्वरूपायतेनमः ॥ नमोमोक्षप्रदे तुभ्यंनमोनादात्मनेतथा । नमःशब्दस्वरूपायरूपातीतायतेनमः । त्वंमातासर्वलोकानांत्वमेव जगतःपिता । त्वंभ्रातात्वंसुहृन्मित्रंत्वंप्रियःप्रियरूपधृक् । त्वंगुरुस्त्वंगतिःसाक्षीत्वंपितात्वंपितामहः । नमस्तेभगवन्रुद्रभास्करामिततेजसे ॥ संसारसागरोन्मग्नंमामुद्धरसदाशिव । अनेनपूजनेनत्वंवांछितार्थप्रदोभव । दंडवत्प्रणतोभूत्वास्तुत्वाचैवविशेषतः । एकाग्रःप्रयतोभूत्वामंत्रमेतदुदीरयेत् । अंगहीनंक्रियाहीनंविधिहीनंमहेश्वर । पूजितोसिमयादेवतत्क्षमस्वांबिकापते ॥ अन्यथासक्तचित्तेनक्रियाहीनेनवाविभो । मनोवाक्कायदुष्टेनपूजितोसित्रिलोचन । तत्सर्वंक्षम्यतांदेवदासेकृत्वादयांमयि । इतिप्रार्थ्य ॥ नानास्तोत्रैःस्तुत्वायथाशक्तिपंचाक्षरमंत्रंजपेत ॥ अस्यश्रीशिवपंचाक्षरमंत्रस्यवामदेवऋषिः । पंक्तिछंदः । शिवोदेवता । श्रीसदाशिवप्रीत्यर्थेजपेवि० ॥ ॐ वामदेवायऋषयेनमःशिरसि । ॐ पंक्तिछंदसेनमोमुखे । ॐ शिवायदेवतायैनमोहृदि ॥ ॐ ओंअंगुष्ठाभ्यांनमः । ॐ नंतर्जनीभ्यां० । ॐ मंमध्यमाभ्यां० । ॐ शिंअनामिकाभ्यां० । ॐ वांकनिष्ठिकाभ्यां० । यंकरतलकरपृष्ठाभ्यां० ॥ एवंहृदयादिन्यासांश्चकृत्वा ॥ ध्यायेनित्यं० ॥ १ ॥ दक्षोत्संगं० ॥ २ ॥ इतिध्यात्वा ॥ ॐ नमःशिवाय ॥

इतिमंत्रंयथाशक्तिजपेत् ॥ अनेनशिवपंचाक्षरमंत्रजपेनश्रीसदाशिवःप्रीयतांनमम ॥ आवाहनंन जानामिनजानामिविसर्जनं । पूजांचैवनजानामित्वंगतिःपरमेश्वर ॥ इतिपठित्वा ॥ सव्यहस्ते नलिंगंस्पृशेत् ॥ अकालमृत्युहरणंब्रह्महत्याविनाशनं । व्याधिघ्नंचैवपास्यामिशिवनिर्णेजनोदकं॥ इतिनिर्णेजनोदकंचुलुकमितंत्रिवारंपिबेत् ॥ प्रयातुभगवान्महादेवः ॥ इतिविसर्जनंकुर्यात् ॥ अनेनशिवपार्थिवपूजनेनश्रीसांबसदाशिवःप्रीयतांनमम ॥ [अस्मिन्प्रयोगेयत्रयत्रमंत्रानोक्ता स्तत्रनत्रपूजावन्मंत्राग्राह्याः] इतिपार्थिवपूजा ॥ ॥ १६ ॥ अथभगवन्मानसपूजा ॥ श्रीगणेशायनमः ॥ हृदंभोजेकृष्णःसजलजलदश्यामलतनुःसरोजाक्षःस्रग्वीमुकुटकटकाद्याभरणवान् । शरद्राकानाथप्रतिमवदनःश्रीमुरलिकांवहन्ध्येयोगोपीगणपरिवृतःकुंकुमचितः ॥ १ ॥ पयोंभोधेर्द्वीपान्ममहृदयमायाहिभगवन्मणिव्रातभ्राजत्कनकवरपीठंभजहरे । सुचिन्हौतेपादौय दुकुलजनेनेज्मिसुजलैर्गृहाणेदंदूर्वाफलजलवदर्घ्यंमुररिपो ॥ २ ॥ त्वमाचामोपेंद्रत्रिदशसरिदंभोतिशिशिरंभजस्वेमंपंचामृतरचितमाप्लावमघहन् । द्युनद्याःकालिंद्याअपिकनककुंभस्थितमिदंजलंतेनस्नानंकुरुकुरुकुरुष्वाचमनकं ॥ ३ ॥ तडिद्वर्णेवस्त्रेभजविजयकांताधिहरणप्रलंबारिभ्रातर्मृदुलमुपवीतंकुरुगले । ललाटेपाटीरंमृगमदयुतंधारयहरेगृहाणेदंमाल्यंशतदलतुलस्यादिरचितं ॥ ४ ॥ दशांगंधूपंसद्वरदचरणाग्रेर्पितमयेमुखंदीपेनेंदुप्रभवरजसादेवकलये । इमौपाणीवाणीपतिनुतसकर्पूररजसाविशोध्याग्रेदत्तंसलिलमिदमाचामनृहरे ॥ ५ ॥ सदातृप्तान्नंषड्रसवदखिलव्यंजनयुतंसुवर्णामत्रेगोघृतचषकयुक्तेस्थितमिदं । यशोदासूनोतत्परमदययाशानसखिभिःप्रसादंवांछद्भिःसहतदनुनीरंपिबाविभो ॥ ६ ॥ सचंद्रंतांबूलंमुखरुचिकरंभक्षयहरेफलंस्वादुप्रीत्यापरिमलवदास्वादयचिरं । सपर्यापर्याप्त्यैकनकमणिजातस्थितमिदंप्रदीपैरारार्तिंजलधितन

याश्लिष्टरचये ॥ ७ ॥ विजातीयैःपुष्पैरभिसुरभिभिर्बिल्वतुलसीयुतैश्चेमंपुष्पांजलिमजिततेमूर्ध्निनिदधे । तवप्रादक्षिण्यक्रमणमघविध्वंसिरचितंचतुर्वारंविष्णोजनिपथगतिश्रांतविदुषा ॥ ८ ॥ नमस्कारोष्टांगःसकलदुरितध्वंसनपटुःकृतंनृत्यंगीतंस्तुतिरपिरमाकांततइयं । तवप्रीत्यैभूयादहमपिचदासस्तवविभोकृतंछिद्रंपूर्णंकुरुकुरुनमस्तेस्तुभगवन् ॥ ९ ॥ सदासेव्यःकृष्णःसजलघननीलःकरतलेदधानोदध्यन्नंतदनुनवनीतंमुरलिकां । कदाचित्कांतानांकुचकलशपत्रालिरचनासमासक्तःस्निग्धैःसहशिशुविहारंविरचयन् ॥ १० ॥ मणिकर्णीच्छयाजातमिदंमानसपूजनं । यःकुर्वीतोषसिप्राज्ञस्तस्यकृष्णःप्रसीदति ॥ **इतिश्रीमच्छंकराचार्यविरचिताभगवन्मानसपूजा** ॥ ॥ १७ ॥ **अथशिवमानसपूजा**॥ श्रीगणेशायनमः ॥ रत्नैःकल्पितमासनंहिमजलैःस्नानंचदिव्यांबरंनानारत्नविभूषितंमृगमदामोदांकितंचंदनं । जातीचंपकबिल्वपत्ररचितंपुष्पंचधूपंतथा दीपंदेवदयानिधेपशुपतेहृत्कल्पितंगृह्यतां ॥ १ ॥ सौवर्णेमणिखंडरत्नरचितेपात्रेघृतंपायसंभक्ष्यंपंचविधंपयोदधियुतंरंभाफलंपानसं । शाकानामयुतंजलंरुचिकरंसुस्निग्धशाल्योदनंतांबूलंमनसामयाविरचितंभक्त्याप्रभोस्वीकुरु ॥ २ ॥ छत्रंचामरयोर्युगंव्यजनकंचादर्शकंनिर्मलंवीणाभेरिमृदंगकाहलकलागीतंचनृत्यंतथा । साष्टांगप्रणतिःस्तुतिर्बहुविधाचैतत्समस्तंमयासंकल्पेनसमर्पितंतवविभोपूजांगृहाणप्रभो ॥ ३ ॥ आत्मात्वंगिरिजामतिःसहचराःप्राणाःशरीरंगृहंपूजातेविषयोपभोगरचनानिद्रासमाधिस्थितिः । संचारःपदयोःप्रदक्षिणविधिःस्तोत्राणिसर्वागिरोयद्यत्कर्मकरोमितत्तदखिलंशंभोतवाराधनं ॥ ४ ॥ करचरणकृतंवाक्कायजंकर्मजंवाश्रवणनयनजंवामानसंवापराधं । विहितमविहितंवासर्वमेतत्क्षमस्वजयजयकरुणाब्धेश्रीमहादेवशंभो ॥ ॥ ५ ॥ **इतिश्रीमच्छंकराचार्यविरचिताशिवमानसपूजा** ॥ ॥ १८ ॥ **अथमाध्यान्ह**

संध्याविधिः ॥ श्रीगणेशायनमः ॥ यथोक्तस्नानानंतरंधौतेवाससीपरिधायगंधामिश्रभस्म
धारणंरुद्राक्षधारणंशिखाबंधनंचकृत्वा॥ आचम्येत्यादिहृदिपवित्रकरणांतंप्रातःसंध्यावत्कृत्वा॥
अद्येत्यादि॰ माध्यान्हसंध्योपासनमहंकरिष्ये ॥ इतिसंकल्प्य ॥ ततआसनादिगायत्रीशिरो
न्यासांतंप्रातःसंध्यावत्कृत्वा ॥ सावित्रींयुवतींश्वेतांगींश्वेतवाससंत्रिनेत्रांवरदाक्षमालांत्रिशूला
भयहस्तांवृषभारूढांयजुर्वेदसंहितांरुद्रदैवत्यांभुवर्लोकव्यवस्थितामादित्यपथगामिनीं । आ
वाहयाम्यहंदेवीमायांतींसूर्यमंडलात् । आगच्छवरदेदेवित्र्यक्षरेरुद्रवादिनी । वरदांत्र्यक्षरांसा
क्षाद्देवीमावाहयाम्यहं । सावित्रिछंदसांमातारुद्रयोनिनमोस्तुते ॥ इत्यावाह्य ॥ आपःपुनंत्वि
तिमंत्रस्यनारायणऋषिः । आपोदेवता । अष्टीछंदः । अंबुप्राशनेवि॰ ॥ ॐ आपःपुनन्तुपृ
थिवींपृथिवीपूतापुनातुमां । पुनन्तुब्रह्मणस्पतिर्ब्रह्मपूतापुनातुमां । यदुच्छिष्टमभोज्यंयद्वादुश्च

रितंमम । सर्वंपुनन्तुमामापोसतांचप्रतिग्रहंस्वाहा ॥ इत्यापःपीत्वाद्विराचामेत् ॥ प्रातःसं
ध्यावन्मार्जनाघमर्षणेकृत्वागायत्र्याश्रीरुद्ररूपिणेश्रीसूर्यनारायणायेदमर्घ्यंदत्तंनममेत्येकमर्घ्यं
दद्यात् ॥ ततःशेषंजपनिवेदनांतंप्रातःसंध्यावत् ॥ अनेनमध्यान्हसंध्यांगभूतेनयथासंख्या
गायत्रीमंत्रजपाख्येनकर्मणाश्रीभगवान्रुद्रस्वरूपीसूर्यनारायणःप्रीयतांनमम ॥ ततःशेषंप्रातः
संध्यावत्कृत्वा ॥ अनेनमध्यान्हसंध्योपासनाख्येनकर्मणाश्रीभगवान्रुद्रस्वरूपीसविताप्रीय
तांनमम ॥ ॐ विष्णवेनमोविष्णवेनमोविष्णवेनमः ॥ ततोब्रह्मपाशेतिशिखामुक्तिंकृत्वापुन
स्तूष्णींशिखांबध्नीयात् ॥ **इतिमध्यान्हसंध्याविधिः** ॥ ॥ १९ ॥ **अथसूर्यनमस्काराः** ॥
श्रीगणेशायनमः ॥ आचम्यप्राणानायम्य ॥ सुमुखश्चेत्यादिपठित्वा ॥ अद्येत्यादि॰ ॥पुराणो
क्तफलप्राप्त्यर्थंममशरीरउत्पन्नोत्पत्स्यमानव्याधिनिरसनार्थंश्रीसूर्यनारायणप्रीत्यर्थं सूर्यनमस्का

राख्यंकर्मकरिष्ये ॥ तदादौन्यासविधिः ॥ ॐ ह्रांअंगुष्ठाभ्यांनमः । ॐ ह्रींतर्जनीभ्यां० । ॐ ह्रूंमध्यमाभ्यां० । ॐ ह्रैंअनामिकाभ्यां० । ॐ ह्रौंकनिष्ठिकाभ्यां० । ॐ ह्रःकरतलकरपृष्ठाभ्यांनमः ॥ एवंहृदयादि ॥ ॐ ह्रांहृदयायनमः । ॐ ह्रींशिरसेस्वाहा । ॐ ह्रूंशिखायैवषट् । ॐ ह्रैंकवचायहुं । ॐ ह्रौंनेत्रत्रयायवौषट् । ॐह्रः अस्त्रायफट् ॥ अथध्यानं ॥ ध्येयःसदासवितृमंडलमध्यवर्तीनारायणःसरसिजासनसन्निविष्टः । केयूरवान्मकरकुंडलवान्किरीटीहारीहिरण्मयवपुर्धृतशंखचक्रः ॥ एवंध्यात्वानमस्कारान्कुर्यात् ॥ तद्यथा ॥ ॐ ह्रांमित्रायनमः । १ । ॐ ह्रींरवयेनमः । २ । ॐ ह्रूंसूर्याय० । ३ । ॐ ह्रैंभानवे० । ४ । ॐ ह्रौंखगाय० । ५ । ॐ ह्रःपूष्णे० । ६ । ॐ ह्रांहिरण्यगर्भाय० । ७ । ॐ ह्रींमरीचये० । ८ । ॐ ह्रूंआदित्याय० । ९ । ॐ ह्रैंसवित्रे० । १० । ॐ ह्रौंअर्काय० । ११ । ॐ ह्रःभास्करायनमः ॥ १२ ॥

इतियथाशक्त्यावृत्तीःकुर्यात् ॥ आदित्यस्यनमस्कारंयेकुर्वंतिदिनेदिने । जन्मांतरसहस्त्रेषुदारिद्र्यंनोपजायते ॥ अनेनसूर्यनमस्काराख्येनकर्मणाश्रीसविताप्रीयतांनमम ॥ तत्सद्ब्रह्मार्पणमस्तु ॥

इतिसूर्यनमस्काराः ॥२०॥ अथब्रह्मयज्ञविधिः ॥ श्रीगणेशायनमः ॥ सूर्यनमस्कारानंतरंदर्भेषूपविश्यदर्भपाणिःस्वाध्यायंचयथाशक्त्यादावारभ्यवेदं ॥ आचम्यप्राणानायम्य ॥ अद्येत्यादि० ॥ ममात्मनःश्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थंश्रीपरमेश्वरप्रीत्यर्थंब्रह्मयज्ञेनाहंयक्ष्ये ॥ इतिसंकल्प्य ॥ ॐ पवित्रेस्थो० ॥ इतिकुशपवित्रंधृत्वा ॥ अथातोब्रह्मयज्ञंव्याख्यास्यामः ॥ इषेत्वादिमंत्रेषुखंब्रह्मांतेषुदशप्रणवसहितेषुयाःक्रियास्तत्रविवस्वानृषिः । सर्वाणिछन्दांꣳसिसर्वाणिसामानि । प्रतिलिंगोक्तादेवता । ब्रह्मयज्ञेवि० । तदादौछंदः पुरुषश्शरीरंन्यसेत् ॥ तिर्यग्बिलश्चमसऊर्ध्वबुध्नःछन्दःपुरुषस्यच ॥ ॐ गौतमभरद्वाजाभ्यांनमः । नेत्रयोः ॥ ॐ विश्वामित्र

जमदग्निभ्यां० । श्रोत्रयोः ॥ ॐ वसिष्ठकश्यपाभ्यां० । नासिके ॥ ॐ अत्रये० । वाचि ॥ ॐ गा
यत्र्यग्निभ्यां० । शिरसि ॥ ॐ उष्णिक्सवितृभ्यां० । ग्रीवायां ॥ ॐ बृहतीबृहस्पतिभ्यां० ।
हनौ ॥ ॐ बृहद्रथंतरद्यावापृथिवीभ्यां० । बाह्वोः ॥ ॐ त्रिष्टुबिन्द्राभ्यां० । नाभौ ॥ ॐ जग
त्यादित्याभ्यां० । श्रोण्योः ॥ ॐ अतिच्छन्दाप्रजापतिभ्यां० । लिंगे ॥ ॐ यज्ञायज्ञियवैश्वानरा
भ्यां० । गुदे ॥ ॐ अनुष्टुब्विश्वेभ्योदेवेभ्यो० । ऊर्वोः ॥ ॐ पंक्तिमरुद्भ्यो० । जान्वोः ॥ ॐ द्वि
पदाविष्णुभ्यां० । पादयोः ॥ ॐ विछन्दावायुभ्यां० । नासापुटस्थप्राणेषु ॥ ॐ न्यूनाक्षराछन्दो
भ्यो० । सर्वांगेषु ॥ एवमेवांगानियोजयित्वावेदमयःसंपद्यते । नकुतश्चिद्भयंविंदते ॥ ॐ भूर्भु
वःस्वः । ॐ तत्संवितु० ॥ १ ॥ ॐ इषेत्वोर्जेत्वावायवस्थदेवोवःसविताप्रार्पयतुश्रेष्ठतमायक
र्मणऽआप्यायध्वमघ्न्याऽइन्द्रायभागम्प्रजावतीरनमीवाऽअयक्ष्मामावस्तेनऽईशतमाघशंसोध्रु
वाऽअस्मिन्गोपतौस्यातबह्वीर्यजमानस्यपशून्पाहि ॥२॥ ॐ वसोःपवित्रम् ॥ ॐ हिरण्मयेनपात्रे
णसत्यस्यापिहितम्मुखम् । योसावादित्येपुरुषःसोसावहम् ॥३॥ ॐ ३ मखम्ब्रह्म ॥ ॐ व्रतमुपैष्यन
न्तरेणाहवनीयञ्चगार्हपत्यञ्चप्राङ्तिष्ठन्नपऽउपस्पृशति । तद्यदपऽउपस्पृशत्यमध्योवैपुरुषोयद
नृतंवदतितेनपूतिरन्तरतोमेध्यावाऽआपोमेध्योभूत्वाव्रतमुपायानीतिपवित्रंवाऽआपःपवित्रपूतोव्र
तमुपायानीतितस्माद्वाऽअपऽउपस्पृशति ॥ १ ॥ ॐ सोग्निमेवाभीक्षमाणोव्रतमुपैति ॥ ॐ पूर्णम
दःपूर्णमिदम्पूर्णात्पूर्णमुदुच्यते । पूर्णस्यपूर्णमादायपूर्णमेवावशिष्यते ॥ ॐ खंब्रह्म । ॐ खंपुराणम् ।
ॐ वायुरेवखमितिहस्माहकौरव्यायणीपुत्रोवेदयंब्राह्मणाविदुर्वेदेनेनयद्वेदितव्यम् ॥ ॐ प्राश्नी
पुत्रादासुरिवासिनः प्राश्नीपुत्रऽआसुरायणादासुरायणऽआसुरेरासुरिर्याज्ञवल्क्याद्याज्ञवल्क्यऽउ
द्दालकादुद्दालकोऽरुणादरुणऽउपवेशेरुपवेशिःकुश्रेःकुश्रिर्वाजश्रवसोवाजश्रवाजिह्वावतोबाध्यो

गाजिव्हावान्बाध्योगोऽसिताद्वार्षगणादासितोवार्षगणोहरितात्कश्यपाद्धारितःकश्यपःशिल्पात्क
श्यपाच्छिल्पःकश्यपःकश्यपान्नैध्रुवेःकश्यपोनैध्रुविर्वाचोवागम्भिण्याऽअम्भिण्यादित्यादादित्या
नीमानिशुक्लानियजूꣳषिवाजसनेयेनयाज्ञवल्क्येनाख्यायन्ते ॥ २ ॥ ॐ अग्निमीळेपुरोहि
तंयज्ञस्यदेवमृत्विजं । होतारंरत्नधातमं ॥ १ ॥ ॐ अग्नआयाहिवीतयेगृणानोहव्यदात
ये । निहोतासत्सिबर्हिषि ॥ २ ॥ ॐ शन्नोदेवीरभिष्टयआपोभवन्तुपीतये । शंयोरभि
स्रवन्तुनः ॥ ३ ॥ अथानुवाकान्वक्ष्यामि । मण्डलंदक्षिणमाक्षिहृदयं । अथशिक्षांप्रवक्ष्यामि ।
अथातोधिकारःफलयुक्तानिकर्माणि । अथातोगृह्यस्थालीपाकानांकर्म । वृद्धिरादैच् । समाम्ना
यःसमाम्नातः । मयरसतजभनलगसंमितं । पंचसंवत्सरमयंयुगाध्यक्षं । गौःग्मा । अथा
तोधर्मजिज्ञासा । अथातोब्रह्मजिज्ञासा । योगीश्वरंयाज्ञवल्क्यं । नारायणंनमस्कृत्य ।

इतिविद्यातपोयोनिरयोनिर्विष्णुरीडितः । वाग्यज्ञेनार्चितोदेवःप्रीयतांमेजनार्दनः ॥ एवंब्रह्म
यज्ञंकृत्वापवित्रत्यागंकुर्यात् ॥ यस्यस्मृत्याचनामोक्त्याब्रह्मयज्ञक्रियादिषु । न्यूनं० ॥ अनेन
ब्रह्मयज्ञाख्येनकर्मणाश्रीभगवान्परमेश्वरःप्रीयतांनमम ॥ ॐ तत्सद्ब्रह्मार्पणमस्तु ॥ **इतिब्रह्म
यज्ञविधिः** ॥ ॥ २१ ॥ **अथतर्पणविधिः** ॥ श्रीगणेशायनमः ॥ आचम्यप्राणानायम्य ॥
अद्येत्यादि० ममात्मनःश्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थंश्रीपरमेश्वरप्रीत्यर्थंदेवर्षिमनुष्यपितृतर्प
णमहंकरिष्ये ॥ ॐ पवित्रेस्थो० ॥ इतिपवित्रंधृत्वा ॥ पात्रउदकमापूर्ययवाक्षतान्तुलसीदलस
हितानिश्वेतगंधाक्षतपुष्पाणिचक्षिप्त्वागंधोदकाक्षतयुक्तांस्त्रीन्कुशान्करसंपुटेधृत्वादेवानावाहयेत्
ॐ विश्वान्देवान्भवत्स्वावाहयिष्ये॥ॐ आवाहय॥ॐ विश्वेदेवासऽआगतशृणुतामऽइमꣳहवम् ।
एदम्बर्हिर्निषीदत ॥ ॐ विश्वेदेवाःशृणुतेमꣳहवम्मेयेऽअन्तरिक्षेयऽउपद्यविष्ठ । येऽअग्निजि

ऽहाउतवाषजंत्राऽआसद्यास्मिन्बर्हिषिंमादयध्वम्॥ आगच्छंतुमहाभागाविश्वेदेवामहाबलाः। येतर्पणेऽत्रविहिताःसावधानाभवंतुते ॥ इत्यावाह्य ॥ अथदेवतर्पणं ॥ सव्यं ॥ ॐ (तीर्थानितृप्यन्ताम्। ॐ तीर्थदेवतास्तृप्यंताम्। ॐ विश्वेदेवास्तृ०। ॐ मोदास्तृ०। ॐ प्रमोदास्तृ०। ॐ सुमुखास्तृ०।ॐ दुर्मुखास्तृ०। ॐ अविघ्नास्तृ०। ॐ विघ्नकर्तारस्तृ०।अयंपाठःकेषुचित्पुस्तकेषु दृश्यतेनतुसूत्रे) ॐ ब्रह्मातृप्यताम्। ॐ विष्णुस्तृप्यताम्। ॐ रुद्रस्तृ०। ॐ प्रजापतिस्तृ०। ॐ देवास्तृप्यन्ताम्। ॐ छन्दाꣳसितृप्यन्ताम्। ॐ वेदास्तृ०। ॐ ऋषयस्तृ०। ॐ पुराणाचार्यास्तृ०।ॐ गंधर्वास्तृ०।ॐ इतराचार्यास्तृ०।ॐ संवत्सरःसावयवस्तृप्यताम्। ॐ देव्यस्तृप्यन्ताम्।ॐ अप्सरसस्तृ०।ॐ देवानुगास्तृ०ॐ नागास्तृ०।ॐ सागारास्तृ०ॐपर्वतास्तृ०।ॐसरितस्तृ०।ॐ मनुष्यास्तृ०। ॐ यक्षास्तृ०। ॐ रक्षाꣳसितृ०। ॐ पिशाचास्तृ०। ॐ सुपर्णास्तृ०।

ॐ भूतानितृ०। ॐ पशवस्तृ०। ॐ वनस्पतयस्तृ०।ॐ ओषधयस्तृ०। ॐ भूतग्रामश्चतुर्विधस्तृप्यताम्। इतिमंत्रैःप्राङ्मुखंकुशाग्रैर्देवतीर्थेनैकैकमंजलिंदद्यात्। अथमनुष्यदेवतर्पणम् ॥ निवीती ॥ ॐ सनकस्तृप्यतु। ॐ सनकस्तृप्यतु। [मनुष्यदेवतर्पणेसर्वत्र ॐ सनकस्तृप्यत्वित्यादिद्विवारमुच्चार्यं] ॐ सनंदनस्तृ०।२। ॐ सनातनस्तृ०।२। ॐ कपिलस्तृ०।२। ॐ आसुरिस्तृ०।२। ॐ वोढुस्तृ०।२। ॐ पंचशिखस्तृ०।२। इतिमंत्रैरुत्तराभिमुखंकुशाग्रैःप्राजापत्यतीर्थेनद्वौद्वावंजलीदद्यात् ॥ अथपितृतर्पणं ॥ अपसव्यं ॥ कव्यवाडनलस्तृप्यताम्। कव्य०। कव्य०। [पितृतर्पणेसर्वत्रकव्यवाडनलस्तृप्यतामित्यादित्रिः] सोमस्तृप्यताम्।३। यमस्तृ०।३। अर्यमातृ०।३। अग्निष्वात्ताःपितरस्तृप्यन्ताम्।३। सोमपाःपितरस्तृ०।३। बर्हिषदःपितरस्तृ०।३। इतिमंत्रैर्दक्षिणाभिमु


खंकुशमूलाग्रैःपितृतीर्थेनतिलमिश्रजलेनत्रींस्त्रीनंजलीन्दद्यात् ॥ अथयमतर्पणम् ॥ [यमतर्पणेऽपियमायनमइत्यादिपूर्ववत्सर्वत्रात्रिः] यमायनमः ३ । धर्मराजाय० । ३ । मृत्यवे० । ३ । अन्तकाय० । ३ । वैवस्वताय० । ३ । कालाय० । ३ । सर्वभूतक्षयाय० । ३ । औदुम्बराय० । ३ । दध्नाय० । ३ । नीलाय० । ३ । परमेष्ठिने० । ३ । वृकोदराय० । ३ । चित्राय० । ३ । चित्रगुप्ताय० । ३ । इतिपूर्ववदपसव्येनत्रींस्त्रीनंजलीन्दद्यात् ॥ अथमनुष्यपितृतर्पणं ॥ ॐ समस्तपितॄनावाहयिष्ये । ॐ आवाहय ॥ ॐ उशन्तस्त्वानिधीमह्युशन्तःसमिधीमहि । उशन्नुशतऽआवहपितॄन्हविषेऽअत्तवे ॥ इत्यावाह्य ॥ पूर्ववत्सर्वत्रत्रयोंऽजलयः ॥ [पुरुषस्थानेइदंजलंतस्मैस्त्रीस्थानेतस्यैस्वधानमइतिसर्वत्रत्रिः] अमुकगोत्रःअस्मत्पिताअमुकशर्मावसुरूपस्तृप्यताम् । इदंजलंतस्मैस्वधानमः । इदं० । इदं० ॥ अमुकगो

त्रःअस्मत्पितामहःअमुकशर्मारुद्ररूपस्तृ० । इदंजलं० ॥ ३ ॥ अमुकगोत्रःअस्मत्प्रपितामहः अमुकशर्माआदित्यरूपस्तृ० । इदंजलं० ॥ ३ ॥ अमुकगोत्राअस्मन्माताअमुकदावसुरूपातृप्यताम् । इदंजलंतस्यै० ॥ ३ ॥ अमुकगोत्राअस्मत्पितामहीअमुकदारुद्ररूपातृ० । इदंजलं० ॥ ३ ॥ अमुकगोत्राअस्मत्प्रपितामहीअमुकदाआदित्यरूपातृ० । इदंजलं ॥ ३ ॥ अमुकगोत्राअस्मत्सापत्नमाताअमुकदावसुरूपातृ० । इदंजलंतस्यै० ॥ ३ ॥ ॐ उदीरतामवरऽउत्परासऽउन्मध्यमाःपितरःसोम्यासः । असुंयऽईयुरवृकाऽऋतज्ञास्तेनोवन्तुपितरोहवेषु ॥ ॥ १ ॥ अङ्गिरसोनःपितरोनवग्वाऽअथर्वाणोभृगवःसोम्यासः । तेषांवयꣳसुमतौयज्ञियानामपिभद्रेसौमनसेस्याम ॥ २ ॥ आयन्तुनःपितरःसोम्यासोग्निष्वात्ताःपथिभिर्देवयानैः । अस्मिन्यज्ञेस्वधयामदन्तोधिब्रुवन्तुतेवन्त्वस्मान् ॥ ३ ॥ ऊर्जंवहन्तीरमृतंघृतम्पयःकीलालं

म्परिस्रुतम् । स्वधास्थतर्पयतमेपितॄन् ॥ ४ ॥ पितृभ्यः स्वधायिभ्यः स्वधानमः पितामहे
भ्यः स्वधायिभ्यः स्वधानमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधानमः । अक्षन्पितरोमीमदन्तपि
तरोतीतृपन्तपितरः पितरः शुन्धध्वम् ॥ ५ ॥ येचेहपितरोयेचनेहयाँश्चविद्मयाँ२ ॥ उच्चनप्र
विद्म । त्वंवेत्थयतितेजातवेदः स्वधाभिर्यज्ञꣳसुकृतञ्जुषस्व ॥६॥ मधुवाता०॥७॥ मधुनक्तं०॥८॥
मधुमान्नो०॥ ९ ॥ तृप्यध्वंतृप्यध्वंतृप्यध्वमितित्रिर्जलप्रसेकः ॥ ॐ नमोवः पितरोरसायनमो
वः पितरः शोषायनमोवः पितरोजीवायनमोवः पितरः स्वधायैनमोवः पितरोघोरायनमोवः पितरो
मन्यवेनमोवः पितरः पितरोनमोवोगृहान्नः पितरोदत्तसतोवः पितरोदेष्मैतद्वः पितरोवासः ॥
॥ १ ॥ आधत्तपितरोगर्भंकुमारम्पुष्करस्रजम् । यथेहपुरुषोसत् ॥ २ ॥ अमुकगोत्रःअस्म
न्मातामहःअमुकशर्मावसुरूपस्तृप्यताम् । इदंजलंतस्मै० ॥ ३ ॥ अमुकगोत्रःअस्मत्प्रमाता

महःअमुकशर्मारुद्ररूपस्तृ० । इदंजलं० ॥ ३ ॥ अमुकगोत्रःअस्मद्वृद्धप्रमातामहःअमुक
शर्माआदित्यरूपस्तृ० । इदंजलं० ॥३॥ अमुकगोत्राअस्मन्मातामहीअमुकदावसुरूपातृ० ।
इदंजलंतस्यै० ॥ ३ ॥ अमुकगोत्राअस्मत्प्रमातामहीअमुकदारुद्ररूपातृ० । इदंजलं०॥३॥ अ
मुकगोत्राअस्मद्वृद्धप्रमातामहीअमुकदाआदित्यरूपातृ० । इदं० ॥३॥ अमुकगोत्राअस्मत्पत्नी
अमुकदावसुरूपातृ० । इदंजलं० ॥ ३ ॥ [सुतादारभ्यपुरुषस्थानेभार्यापुत्रादिकंमृतंचेत्सप
त्नीकःससुतःस्त्रीस्थानेभर्तृपुत्रादिकंमृतंचेत्सभर्तृकाससुताइतिविशेषऊहःकार्यः] अमुकगोत्रः
अस्मत्सुतःअमुकशर्मावसुरूपस्तृ० । इदंजलं० ॥ ३ ॥ अमुकगोत्राअस्मत्कन्याअमुकदावसु
रूपातृ० । इदंजलं० ॥३॥ अमुकगोत्रःअस्मत्पितृव्यःअमुकशर्मावसुरूपस्तृ० । इदंजलं०
॥ ३ ॥ अमुकगोत्रःअस्मन्मातुलःअमुकशर्मावसुरूपस्तृ० । इदंजलं० ॥ ३ ॥ अमुकगोत्रः

य०ब्र० अस्मद्भ्राताअमुकशर्मावसुरूपस्तृ० । इदंजलं० ॥ ३ ॥ अमुकगोत्राअस्मत्पितृभगिनीअमुकदा कर्म
वसुरूपातृ० । इदंजलं० ॥ ३ ॥ अमुकगोत्राअस्मन्मातृभगिनीअमुकदावसुरूपातृ० । इदं
॥६१॥ जलं० ॥ ३ ॥ अमुकगोत्राअस्मद्भगिनीअमुकदावसुरूपातृ० । इदंजलं० ॥ ३ ॥ अमुकगोत्रः
अस्मच्छ्वशुरःअमुकशर्मावसुरूपस्तृ० । इदंजलं० ॥ ३ ॥ अमुकगोत्रःअस्मद्गुरुःअमुकशर्माव
सुरूपस्तृ० । इदंजलं० ॥ ३ ॥ अमुकगोत्रःअस्मच्छिष्यःअमुकशर्मावसुरूपस्तृ० । इदंजलं०
॥३॥ अमुकगोत्रःअस्मदाप्तःअमुकशर्मावसुरूपस्तृ० । इदंजलं० ॥३॥ आब्रह्मस्तंबपर्यंतंदेवर्षि
पितृमानवाः । तृप्यंतुपितरःसर्वेमातृमातामहादयः॥अतीतकुलकोटीनांसप्तद्वीपनिवासिनां । आ
ब्रह्मभुवनाल्लोकादिदमस्तुतिलोदकं ॥ येबांधवाबांधवायेयेन्यजन्मनिबांधवाः । तेसर्वेतृप्तिमायां ॥६१॥
तुमयादत्तेनवारिणा॥येकेचास्मत्कुलेजाताअपुत्रागोत्रिणोमृताः । तेगृह्णन्तुमयादत्तंवस्त्रनिष्पीडनो
दकं॥इतिचतुर्गुणमुपरिदशवस्त्रंस्थलेवामभागेनिष्पीड्यपवित्रंविसृज्योपवीत्याचम्यप्राणानायम्य
॥[द्वादश्यांपंचदश्यांसंक्रांतौश्राद्धवासरेवस्त्रपीडनंन] ततःपात्रेसव्येनशुद्धोदकंपूरयित्वातन्मध्येना



मिकयाषड्दलंकृत्वाप्राचीमारभ्यकोणेषुब्रह्मविष्णुरुद्रसवितृमित्रवरुणान्विभाव्यपात्रेश्वे
तगंधाक्षतपुष्पतुलसीदलानिप्रक्षिप्यदेवेभ्योर्घ्याणिदद्यात् ॥ ॐ ब्रह्मयज्ञानम्प्र
थमम्पुरस्ताद्विसीमतःसुरुचोवेनऽआवः । सबुध्न्याऽउपमाऽअस्यविष्ठाःसतश्च
योनिमसतश्चविवः ॥ ॐ भूर्भुवःस्वः । ब्रह्मणेनमःइदमर्घ्यंदत्तंनमम ॥ ॐ इ
दंविष्णुर्विचक्रमेत्रेधानिदधेपदम् । समूढमस्यपाᳪसुरेस्वाहा॥ॐ भूर्भुवःस्वः।
विष्णवेनमःइदमर्घ्यं०॥ ॐ नमस्तेरुद्र० । ॐ भूर्भुवःस्वःरुद्रायनमःइदमर्घ्यं०॥
ॐ तत्सवितु० ॥ॐ भूर्भुवःस्वःसवित्रेनमःइदमर्घ्यं० ॥ ॐ मित्रस्यचर्षणीधृतोवोदेवस्यसानसि ।

द्युम्नञ्चित्रश्रवस्तमम्॥ॐ भूर्भुवःस्वः। मित्रायनमःइदमर्घ्यं०॥ॐ इमम्मेवरुण०॥ॐ भूर्भुवःस्वः।
वरुणायनमःइदमर्घ्यं०॥एवंषडर्घ्याणिदत्वासूर्योपस्थानंकुर्यात्॥ ॐ अद्दृश्रमस्यकेतवोविरश्मयो
जनाँ२॥अनु। भ्राजन्तोऽअग्नयोयथा॥उपयामगृहीतोसिसूर्यायत्वाभ्राजायैषतेयोनिःसूर्यायत्वा
भ्राजाय। सूर्यभ्राजिष्ठभ्राजिष्ठस्त्वन्देवेष्वसिभ्राजिष्ठोहम्मनुष्येषुभूयासम्॥१॥ॐ हꣳसःशुचिषद्व
सुरन्तरिक्षसद्धोतावेदिषदतिथिर्दुरोणसत्। नृषद्वरसदृतसद्व्योमसदब्जागोजाऽऋतजाऽअद्रिजाऽ
ऋतम्बृहत्॥२॥इत्युपस्थाय ॥ अथदिग्देवतानमस्कारान्प्राच्यैदिशेइन्द्रायनमःइत्यारभ्यअध
स्ताद्विष्णवेनमः। अनंतायनमःइत्यंतंप्रातःसंध्यावत्कृत्वा॥जलमध्ये॥ॐ ब्रह्मणेनमः । ॐ अ
ग्नये०। ॐ पृथिव्यै०। ॐ ओषधीभ्यो०। ॐ वाचे०। ॐ वाचस्पतये०। ॐ महद्भ्यो०। ॐ विष्ण
वे०।ॐ अद्भ्यो०। ॐ अपाम्पतये०। ॐ वरुणायनमः ॥ॐ संवर्चसापयसासन्तनूभिरगन्महिमन
सासꣳशिवेन। त्वष्टासुदत्रोविदधातुरायोनुमार्ष्टुतन्वोयद्विलिष्टम्॥इतिमुखंशुद्धोदकेनविमृजेत् ॥
ॐ देवागातु० ॥ इतिविसर्जनं ॥ अनेनदेवर्षिमनुष्यपितृतर्पणाख्येनकर्मणाश्रीभगवान्समस्त
पितृस्वरूपीजनार्दनवासुदेवःप्रीयतांनमम ॥ तत्सद्ब्रह्मार्पणमस्तु॥ श्रीगयागदाधरःप्रीतोभवतु॥
विष्णवेनमइतित्रिः ॥ **इतितर्पणविधिः ॥२२॥ अथवैश्वदेवप्रयोगः** ॥ श्रीगणेशायनमः॥
आचम्यप्राणानायम्य ॥ अद्येत्यादि०ममात्मनःश्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थममगृहेपंचसू
नाजनितसकलदोषपरिहारपूर्वकंनित्यकर्मानुष्ठानसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंपंचमहायज्ञैरहंय
क्ष्ये ॥ ॐ पवित्रेस्थो० ॥ इतिकुशपवित्रंधृत्वा ॥ दर्भैःपरिसमुह्य। गोमयेनोपलिप्य । दर्भे
णोल्लिख्य । अनामिकांगुष्ठाभ्यामुद्धृत्यउदकेनाभ्युक्ष्य । अग्निमुपसमाधाय । पावकनामानम
ग्निंप्रतिष्ठाप्य । प्रोक्षितेंधनानिनिक्षिप्य । वेणुधमन्याप्रज्वाल्यध्यायेद्देवं॥ ॐ चत्वारिशृङ्गात्रयो

अस्यपादाद्वेशीर्षेसप्तहस्तासोऽअस्य । त्रिधाबद्धोवृषभोरोरवीतिमहोदेवोमर्त्याँ२ ॥ आवि
वेश ॥ १ ॥ एषोहदेवःप्रदिशोनुसर्वाःपूर्वोहजातःसऽउगर्भेऽअन्तः । सऽएवजातःसजं
निष्यमाणःप्रत्यङ्जनास्तिष्ठतिसर्वतोमुखः ॥ २ ॥ मुखंयःसर्वदेवानांहव्यभुक्कव्यभुक्तथा ।
पितॄणांचनमस्तस्मैविष्णवेपावकात्मने ॥ पावकनाम्नेवैश्वानरायनमः । अग्नयेअन्नंनमः ।
अग्नयेगंधंनमः । अग्नयेअक्षतान्नमः । अग्नयेपुष्पंनमः । अग्नयेनमोनमः ॥ ततोऽग्निंप्र
दक्षिणंत्रिःपर्युक्ष्य । इतरथावृत्तिः ॥ पात्रेऽन्नमादाय । अन्नंप्रोक्ष्य । घृतेनाभिघार्य ।
उदकेनपर्युक्ष्य । विधूमज्वालाग्नौमध्यमानामिकांगुष्ठैर्बदरीफलप्रमाणाहुतीःसव्यंपाणितलंह
दिन्यस्यजुहुयात् ॥ तत्प्राक्समिधप्रजापतयइत्याहुतिंव्याहृतिभिश्चत्वार्याज्याहुतीश्चजुहुयात् ॥
तद्यथा॥ ॐसमिधप्रजापतयेस्वाहा । इदंसमिधप्रजापतयेनमम॥ ॐभूःस्वाहा ।इदमग्नयेनमम

॥६३॥


ॐभुवःस्वाहा । इदंवायवे०॥ ॐ स्वःस्वाहा । इदंसूर्याय०॥ ॐ भूर्भुवःस्वःस्वाहा । इदंप्रजा
पतये० ॥ अथान्नाहुतयः ॥ ॐ देवकृतस्यैनसोवयजनमसिस्वाहा । इदमग्नयेनमम ॥ १ ॥
ॐ मनुष्यकृतस्यैनसो० । इदमग्नये० ॥ २ ॥ ॐ पितृकृतस्यैनसो० । इदमग्नये० ॥ ३ ॥
ॐ आत्मकृतस्यैनसो० । इदमग्नये० ॥ ४ ॥ ॐ एनसऽएनसो० । इदमग्नये० ॥ ५ ॥ ॐ य
च्चाहमेनोविद्वाँश्चकारयच्चाविद्वाँस्तस्यसर्वस्यैनसो० । इदमग्नये० ॥ ६ ॥ ॐ प्रजापतयेस्वाहा ।
इदंप्रजापतये० ॥ ७ ॥ ॐ अग्नयेस्विष्टकृतेस्वाहा । इदमग्नयेस्विष्टकृतेनमम ॥ ८॥ इतिहुत्वा
अथाग्नेःपश्चादुदकेनचतुरंगुलमात्रंवितस्तिमात्रंवाचतुरस्रमंडलंकृत्वातदुपरिबलिहरणंकुर्यात् ॥
[बलिहरणेसर्वत्र ॐ कारपूर्वकंचतुर्थ्यंतंनमःपदंत्यागंच । यथा ॐ धात्रेनमः । इदंधात्रेनमम ।
एवंसर्वत्र] धात्रेविधात्रेचद्वारयोर्वायवेप्रतिदिशंदिग्भ्यश्चमध्येब्रह्मणेन्तरिक्षायसूर्यायत्रीन्तदुत्त

 रतोविश्वेभ्योदेवेभ्योविश्वेभ्योभूतेभ्यइतिद्वेतदुत्तरतउषसेभूतानांपतयेइतिद्वे ॥ अत्रदेवनैवेद्यं ।
विधिस्तुपूजाप्रयोगे ॥ ततोपसव्यं ॥ पितृभ्यःस्वधानमइत्याहुतिःपित्रादिसमस्तपितृणांगोत्रना
 मोच्चारपूर्वकंब्रह्मान्तरिक्षसूर्येभ्योदक्षिणतः ॥ सव्यंपात्रंनिर्णिज्ययक्ष्मैतत्तेवायव्यांनिनयेदुदकोप
स्पर्शनंकृत्वा । निवीती ॥ हन्ततेसनकादिभ्यउत्तरे ॥ सव्यं ॥ ब्रह्मयज्ञसिध्यर्थंत्रिवारंगायत्रीं
जपेत् ॥ इतिबलिहरणं ॥ अथगोग्रासादिसमर्पणं ॥ सुरभिर्वैष्णवीमातानित्यंविष्णुपदेस्थिता ।
गोग्रासंतुमयादत्तंसुरभिःप्रतिगृह्यतां ॥ इदंगोभ्योनमम । द्वौश्वानौश्यामशबलौवैवस्वतकुलो
द्भवौ । ताभ्यामन्नंप्रदास्यामिरक्षेतांपथिमांसदा ॥ इदंश्वभ्यां० ॥ यमोसियमदूतोसिवायसोसि
महाबल । अहोरात्रकृतंपापंबलिंभक्षतुवायसः ॥ इदंवायसेभ्यो० ॥ देवामनुष्याःपशवोवयां
सिसिद्धाश्चयक्षोरगदैत्यसंघाः। प्रेताःपिशाचास्तरवःसमस्तायेचान्नमिच्छन्तिमयाप्रदत्तं ॥ इदंदे

वादिभ्यो० ॥ पिपीलिकाकीटपतंगकाद्याबुभुक्षिताःकर्मनियोगयुक्ताः । प्रयांतुतेतृप्तिमिदंमयान्नं
तेभ्योवसृष्टंसुखिनोभवंतु ॥ इदंपिपीलिकाकीटपतंगेभ्योनमम ॥ इतिगोग्रासादिसमर्पणं ॥ ह
स्तंप्रक्षाल्य ॥ ॐ त्र्यायुषञ्जमदग्नेः० ॥ शतायुषंबलायुषं ॥ इतिललाटेग्रीवायांबाह्वोर्हृदिचभ
स्मधारयेत् ॥ गच्छगच्छसुरश्रेष्ठस्वस्थानेपरमेश्वर । यत्रब्रह्मादयोदेवास्तत्रगच्छहुताशन ॥
ॐ यज्ञंयज्ञङ्गच्छयज्ञपतिङ्गच्छस्वांयोनिङ्गच्छस्वाहा । एषतेयज्ञोयज्ञपतेसहसूक्तवाकःसर्ववीर
स्तञ्जुषस्वस्वाहा ॥ इत्यग्निंविसृज्य॥ प्राग्दत्तबलिंगृहाद्बहिर्गोभ्योवायसादिभ्यश्चसमर्प्यहस्तौपा
दौप्रक्षाल्याचम्य । गोदोहनमात्रंस्थित्वातिथिमाकांक्षेत् ॥ ततोगृहंप्रविशेत् ॥ अनेनवैश्वदेवा
ख्येनकर्मणाश्रीयज्ञनारायणस्वरूपीपरमेश्वरःप्रीयतांनमम ॥ तत्सद्ब्रह्मा० । यस्यस्मृत्याचना
मोक्त्यावैश्वदेवक्रियादिषु । न्यूनं० ॥ विष्णवेनमइतित्रिः ॥ अतिथिःप्राप्तश्चेत्तमासनपाद्यार्घ्य

पूजनभोजनतांबूलदक्षिणादिभिःसंतोषयेत् ॥ इतिवैश्वदेवप्रयोगः ॥

[सर्वत्र ॐकारपूर्वकंचतुर्थ्यंतंनमःपदंत्यागंच] प्राची अथ बलिहरणपटः



॥ २३ ॥ अथभोजनविधिः ॥ श्रीगणेशायनमः ॥ प्रक्षालितहस्तपादआचांतोधृतोत्तरीयवस्त्रोधृतश्रीखंडगंधत्रिपुंड्रोभोजनशालामागत्यशुचावासनेप्राङ्मुखउपविश्य ॥ यथाचक्रधरोविष्णुस्त्रैलोक्यंपरिरक्षति । एवंमंडलभस्मैतत्सर्वभूतानिरक्षतु ॥ इतिचतुरस्रमंडलंकृत्वातदुपरिपात्रंनिधाय ॥ शाकादींश्चपुरःस्थाप्यभक्ष्यंभोज्यंचवामतः । अन्नंमध्येप्रतिष्ठाप्यदक्षिणेघृतपायसं । एवंपरिवेषणंकारयित्वा ॥ प्रांजलिमन्नंप्रणम्यास्माकंनित्यमेवतदस्त्विवतिप्रार्थ्य ॥ ॐ पितुन्नुस्तोषम्महोधर्माणन्तविषीम्। यस्यंत्रितोव्योजसावृत्रंविपर्वमर्दयंत् ॥ इतिस्तुत्वा ॥ ॐमानस्तोके० ॥ ॐ नमोवर्क्किरिकेभ्यो० ॥ ॐ नमःशम्भवायच० ॥ इतितिसृभिरन्नमभिमंत्र्य ॥ सत्यंत्वर्तेनपरिषिंचामीतिदिवा । ऋतंत्वासत्येनपरिषिंचामीतिरात्रौप्रदक्षिणमन्नंपरिषिच्य ॥ ॐ तेजोसिशुक्रमस्य० ॥ इत्यभिमृश्य ॥ ॐ अग्निरस्मिजन्मनाजातवेदाघृतम्मेचक्षुर

य०ब्र० मृतम्मऽआसन् । अर्कस्त्रिधातूरजसोविमानोजस्त्रो घर्मोहविरस्मिनाम ॥ इत्यात्मानमग्निंध्या कर्मः
त्वा ॥ दक्षिणतोभुव्युदकधारांप्राक्संस्थांकृत्वा ॥ तत्र ॐ भूपतयेस्वाहा । ॐ भुवनपतये० ।
॥६६॥ ॐ भूतानांपतये० ॥ इतिबलित्रयंदत्वा ॥ सर्वेभ्योभूतेभ्योदिवाचरेभ्यःस्वाहेतिदिवानक्तंच
रेभ्यःस्वाहेतिरात्रौचतुर्थबलिंदद्यात् ॥ अपोशनार्थमुदकमादाय ॥ अंतश्चरतिभूतेषुगुहायांवि
श्वतोमुखः । त्वंब्रह्मत्वंयज्ञस्त्वंवषट्कारस्त्वमोंकारस्त्वंविष्णोःपरमंपदं ॥ अन्नंब्रह्मारसोविष्णु
र्भोक्तादेवोमहेश्वरः । एवंध्यात्वातुयोभुंक्तेसोन्नदोषैर्नलिप्यते ॥ इतिध्यात्वासमाहितोमृतोपस्त
रणमसीतिनिःशब्दंपीत्वाघृताक्तमन्नंवक्ष्यमाणमंत्रैर्बदरीफलप्रमाणेनास्येजुहुयाद्दन्तैरपृशन्जिव्ह
याग्रसेच्च ॥ ॐप्राणायस्वाहा । ॐअपानायस्वाहा । ॐ व्यानायस्वाहा । ॐसमानायस्वाहा । ॐ ॥६६॥
उदानायस्वाहा॥ततोजलंस्पृष्ट्वाशिखाग्रंथिंविसृज्ययथेष्टंलौकिकवाक्यान्यनुच्चारयन्वाग्यतोभूत्वा

कवलेकवलइष्टदेवतांध्यायन्भुंजीत ॥ भोजनांतेपात्रस्थमन्नंकिंचिद्गृहीत्वावघ्रायपात्रवामभागे
पितृतीर्थेन "मद्भुक्तोच्छिष्टशेषंयेभुंजंतिपितरोधमाः । तेषामन्नंमयादत्तमक्षय्यमुपतिष्ठतु" इ
तिमंत्रेणभूमौविसृज्य॥उत्तरापोशनार्थंजलमादाय॥ अमृतापिधानमसीत्यर्धंपीत्वा॥रौरवेपूयनिल
येपद्मार्बुदनिवासिनां। अर्थिनामुदकंदत्तमक्षय्यमुपतिष्ठतु॥ इतिशेषमर्धमुच्छिष्टान्नाहुतौपितृतीर्थे
नक्षिपेत्॥अंगणादौपाणिमुखेसंशोध्यप्रक्षाल्याचम्य॥आप्यायस्वेतिभुक्तमन्नमभिमंत्र्य॥प्रणवेना
त्मानंब्रह्मणिसंयोज्य॥जलेनहस्तौनिघृष्य॥शर्यातिंचसुकन्यांचच्यवनंशक्रमश्विनौ । भुक्तमात्रः
स्मरेद्यस्तुचक्षुस्तस्यनहीयते॥इतितज्जलमक्ष्णोर्निषिंचेत्॥ततःशतपदानिगत्वास्वासनउपविश्य॥
अगस्तिरग्निर्वडवानलश्चभुक्तंमयान्नंजरयंत्वशेषं । सुखंममैतत्परिणामसंभवंयच्छंत्वरोगोममचा
स्तुदेहः ॥ इत्युदरंपरिमृज्य ॥ तांबूलंभक्षयेत् ॥ **इतिभोजनविधिः** ॥ ॥ २४ ॥ अथसा

यंसंध्याविधिः ॥ श्रीगणेशायनमः ॥ स्नात्वाहस्तौपादौवाप्रक्षाल्य ॥ आचम्य ॥ भस्मरुद्राक्षधारणंशिखाबंधनंचकृत्वा ॥ आचम्येत्यादिहृदिपवित्रकरणांतंप्रातःसंध्यावत्कृत्वा ॥ अद्येत्यादि० ॥ सायंसंध्योपासनमहंकरिष्ये ॥ ततआसनादिगायत्रीशिरोन्यासांतंप्रातःसंध्यावत् ॥ वृद्धांसरस्वतींकृष्णांपीतवस्त्रांचतुर्भुजां । शंखचक्रगदापद्महस्तांगरुडवाहिनीं॥सामवेदकृतोत्संगांसर्वलक्षणसंयुतां । वैष्णवींविष्णुदैवत्यांविष्णुलोकनिवासिनीं ॥ आवाहयाम्यहंदेवीमायांतींसूर्यमंडलात् । आगच्छवरदेदेवित्र्यक्षरेविष्णुवादिनि ॥ सरस्वतिछंदसांमातर्विष्णुयोनिनमोस्तुते ॥ इत्यावाह्य ॥ अग्निश्चमेतिनारायणऋषिः । अग्निर्देवता । अनुष्टुप्छंदः । अंबुप्राशनेवि०॥ॐ अग्निश्चमामन्युश्चमन्युपतयश्चमन्युकृतेभ्यः । पापेभ्योरक्षंतांयदन्हापापमकार्षं । मनसावाचाहस्ताभ्यां । पद्भ्यामुदरेणशिश्ना । अहस्तदवलुंपतु । यत्किंचिद्दुरितंमयि । इदमहंमाममृतयोनौ । सत्येज्योतिषिजुहोमिस्वाहा ॥ इत्यापःपीत्वाद्विराचम्य ॥ प्रातःसंध्यावन्मार्जनाघमर्षणेकृत्वा ॥ पश्चिमाभिमुखोगायत्र्याश्रीविष्णुरूपिणेश्रीसूर्यनारायणायेदमर्घ्यंदत्तंनममेत्यर्घ्यत्रयंदद्यात् ॥ ततःशेषंजपनिवेदनांतंप्रातःसंध्यावत् ॥ अनेनसायंसंध्यांगभूतेनयथासंख्यागायत्रीमंत्रजपाख्येनकर्मणाश्रीभगवान्विष्णुस्वरूपीसूर्यनारायणःप्रीयतांनमम ॥ ततःशेषंप्रातःसंध्यावत्कृत्वा ॥ अनेनसायंसंध्योपासनाख्येनकर्मणाश्रीविष्णुस्वरूपीसविताप्रीयतांनमम ॥ ॐ विष्णवेनमइतित्रिः ॥ ततोब्रह्मपाशेतिशिखामुक्तिंकृत्वापुनस्तूष्णींशिखांबध्नीयात् ॥ इतिसायंसंध्याविधिः ॥ ॥ २५ ॥ अथयज्ञोपवीताभिमंत्रणंधारणंच ॥ श्रीगणेशायनमः । अद्येत्यादि०पुराणोक्तफलप्राप्त्यर्थंश्रौतस्मार्तकर्मानुष्ठानसिध्यर्थंयज्ञोपवीताभिमंत्रणंधारणंचकरिष्ये ॥ इतिसंकल्प्य ॥ इदंविष्णुर्मेधातिथिर्विष्णुर्गायत्री । सूत्रत्रिगुणीकरणेवि० ॥

॥६७॥

ॐ इदंविष्णु० ॥ आपोहिष्ठेतितिसृणांसिंधुद्वीपआपोगायत्री । यज्ञोपवीतप्रक्षालनेवि० ॥ ॐ आपोहिष्ठा० ॥ ३ ॥ इतिप्रक्षाल्यप्रत्येकयज्ञोपवीतंदशगायत्रीभिरभिमंत्र्यतंतुषुदेवताआवाहयेत् ॥ [आवाहनेसर्वत्रॐकार०व्याहृतिपूर्वकंचतुर्थ्यंतंनमःपदांतंदेवतानामग्राह्यं । यथा ॐ भूर्भुवःस्वः । ॐ कारायनमः । ॐ कारमावाहयामि] प्रथमतंतौ । ॐ कारमावाहयामि ॥ द्वितीयतंतौ । अग्निमावा० ॥ तृतीयतंतौ । सर्पानावा० ॥ चतुर्थतंतौ । सोममावा० ॥ पंचमतंतौ । पितॄनावा० ॥ षष्ठमतंतौ ॥ प्रजापतिमावा० ॥ सप्तमतंतौ । अनिलमावा० ॥ अष्टमतंतौ । यममावा० ॥ नवमतंतौ । विश्वान्देवानावा० ॥ इतिप्रत्येकयज्ञोपवीतेदेवतावाहनंकुर्यात् ॥ ततोग्रंथौदेवताआवाहयेत् ॥ ब्रह्मयज्ञानंप्रजापतिर्ब्रह्मात्रिष्टुप् । ग्रंथिमध्येब्रह्मावाहनेवि० ॥ ॐ ब्रह्मयज्ञान० ॥ ब्रह्माणमावाहयामि ॥ १ ॥ इदंविष्णुःकाण्वोमेधातिथिर्विष्णुर्गायत्री । ग्रंथिमध्येविष्णवावाहनेवि० ॥ ॐ इदंविष्णु० ॥ विष्णुमावाहयामि ॥ २ ॥ त्र्यंबकंवसिष्ठोरुद्रोनुष्टुप् । ग्रंथिमध्येरुद्रावाहनेवि० ॥ ॐ त्र्यम्बकं०मामृतात् ॥ रुद्रमावाहयामि ॥ ३ ॥ इत्यावाह्यपूजयेत् ॥ अथध्यानं ॥ प्रजापतेर्यत्सहजंपवित्रंकार्पाससूत्रोद्भवंब्रह्मसूत्रं । ब्रह्मत्वसिद्ध्यैचयशप्रकाशंजपस्यसिद्ध्यैकुरुब्रह्मसूत्रं ॥ ॐ युवासुवासाःपरिवीतऽआगात्सउश्रेयान्भवतिजायमानः । तंधीरासःकवयउन्नयंतिस्वाध्योमनसादेवयंतः ॥ इतिध्यात्वाधारयेत् ॥ यज्ञोपवीतमितिमंत्रस्यपरमेष्ठीऋषिः । लिंगोक्तादेवता । त्रिष्टुप्छंदः । श्रौतस्मार्तकर्मानुष्ठानसिध्यर्थंयज्ञोपवीतधारणेवि०॥ॐ यज्ञोपवीतम्परमम्पवित्रम्प्रजापतेर्यत्सहजम्पुरस्तात् । आयुष्यमग्र्यंप्रतिमुञ्चशुभ्रंयज्ञोपवीतम्बलमस्तुतेजः ॥ यज्ञोपवीतमसियज्ञस्यत्वायज्ञोपवीतेनोपनह्यामि ॥ इतिदक्षिणबाहुमुद्धृत्यकंठेधारयेत् ॥ इतियज्ञोपवीतानांपृथग्धारणंकुर्यात् ॥

आचम्य ॥ एतावद्दिनपर्यंतंब्रह्मत्वंधारितंमया । जीर्णत्वात्त्वत्परित्यागोगच्छसूत्रयथासुखं ॥
इतिजीर्णोपवीतंशिरोमार्गेणनिःसार्यभूमौत्यजेत् ॥ ततोयथाशक्तिगायत्रीमंत्रजपंकुर्यात् ॥ अ
नेनयज्ञोपवीतसंस्कारपूर्वकधारणाख्येनकर्मणाश्रीब्रह्मस्वरूपीजनार्दनवासुदेवःप्रीयतांनमम ॥
तत्सद्ब्रह्मा० ॥ विष्णवेनमइतित्रिः ॥ **इतियज्ञोपवीताभिमंत्रणंधारणंच** ॥ ॥ २६ ॥

अथमृत्युंजयजपविधिः ॥ श्रीगणेशायनमः ॥ आचम्यप्राणानायम्य ॥ देवान्नमस्कृत्य ॥ सु
मुखश्चेत्यादिश्लोकान्पठित्वा ॥ अद्येत्यादि० पुराणोक्तफलप्राप्त्यर्थंममशरीरउत्पन्नोत्पत्स्यमानाधि
दैविकाधिभूतिकाध्यात्मिकत्रिविधपीडोपशांतिद्वारासद्यआरोग्यतावाप्त्यर्थंश्रीमहामृत्युंजयदेव
ताप्रीत्यर्थंश्रीमहामृत्युंजयमंत्रजपमहंकरिष्ये ॥ आदौगणेशंमहादेवंचसंपूज्यमृत्युंजयंप्रार्थयेत्॥
मृत्युंजयमहादेवत्राहिमांशरणागतं । जन्ममृत्युजरारोगैःपीडितंकर्मबंधनैः ॥ तावकस्त्वद्गतप्राण
स्त्वच्चित्तोहंसदामृड । इतिविज्ञाप्यदेवेशंजपेन्मंत्रंत्र्यंबकं ॥ अस्यश्रीमहामृत्युंजयमंत्रस्यवसिष्ठ
ऋषिः । श्रीमहामृत्युंजयरुद्रोदेवता । अनुष्टुप्छंदः । हौंबीजम् । जूंशक्तिः । सःकीलकम् । श्री
मृत्युंजयप्रीत्यर्थेजपेवि० ॥ तदादौन्यासाः ॥ ॐ वसिष्ठऋषयेनमःशिरसि । ॐ अनुष्टुप्छंदसेन
मःमुखे । ॐ महामृत्युंजयदेवतायैनमःहृदये । ॐ हौंबीजायनमःगुह्ये । ॐ जूंशक्तयेनमःपाद
योः । ॐ सःकीलकायनमःसर्वांगेषु ॥ ॐ त्र्यम्बकंअंगुष्ठाभ्यांनमः । ॐ यजामहेतर्जनीभ्यां० ।
ॐ सुगन्धिम्पुष्टिवर्धनम्मध्यमाभ्यां० । ॐ उर्वारुकमिवबन्धनात्अनामिकाभ्यां० । ॐ मृत्यो
र्मुक्षीयकनिष्ठिकाभ्यां० । ॐ मामृतात्करतलकरपृष्ठाभ्यां० ॥ एवंहृदयादिषडंगन्यासविधिंविधाय
ध्यायेद्देवं ॥ ॐ चंद्रोद्भासितमूर्धजंसुरपतिंपीयूषपात्रंमहद्धस्ताब्जेनदधन्सुदिव्यममलंहासास्यपं
केरुहं । सूर्येन्द्वग्निविलोकनंकरतलेपाशाक्षसूत्रांकुशांभोजंबिभ्रतमक्षयंपशुपतिंमृत्युंजयंतंस्मरे ॥

ॐ लंपृथिव्यात्मकंगंधं । ॐ हंआकाशात्मकंपुष्पं । ॐ यंवाय्वात्मकंधूपं । ॐ रंतेजात्मकंदीपं ॐ वंअमृतात्मकंनैवेद्यं । ॐ संसर्वात्मकंमंत्रपुष्पंसमर्प्यमंत्रंजपेत् ॥ अथमंत्रःषट्प्रणवयुक्तः ॥ ॐ हौंजूंसः । ॐ भूर्भुवःस्वः । ॐ त्र्यम्बकंयजामहेसुगन्धिम्पुंष्टिवर्धनम् । उर्वारुकमिवबन्धनान्मृत्योर्मुक्षीयमामृतात् ॥ ॐ स्वःभुवःभूः ॐ सःजूंहौं ॐ ॥ अथचतुर्दशप्रणवयुक्तोमंत्रः ॥ ॐ हौं ॐ जूं ॐ सः ॐ भूः ॐ भुवः ॐ स्वः ॐ त्र्यम्बकं०॥ ॐ स्वः ॐ भुवः ॐ भूः ॐ सः ॐ जूः ॐ हौं ॐ ॥ इत्येतयोरेकतमंजपित्वाहृदयादिषडंगोत्तरन्यासंकृत्वा ॥ गुह्यातिगुह्यगोप्तात्वंगृहाणास्मत्कृतंजपं । सिद्धिर्भवतुमेदेवत्वत्प्रसादान्महेश्वर ॥ इतिजपंनिवेद्य ॥ अनेनश्रीमहामृत्युंजयमंत्रजपाख्येनकर्मणाश्रीमहामृत्युंजयःप्रीयतांनमम ॥ **इतिमृत्युंजयजपविधिः** ॥ ॥ २७ ॥

अथनवग्रहमंत्राः ॥ श्रीगणेशायनमः ॥ आचम्यप्राणानायम्य ॥ देवान्नमस्कृत्य ॥ सुमुखश्चेत्यादिश्लोकान्पठित्वा ॥ अद्येत्यादि० पुराणोक्तफलप्राप्त्यर्थंममजन्मराशेःसकाशाद्विरुद्धचतुर्थाष्टमद्वादशादिस्थानस्थितामुकग्रहपीडापरिहारद्वारैकादशस्थानस्थितवदुत्तमफलप्राप्त्यर्थममुकग्रहमंत्रजपमहंकरिष्ये ॥ आदौगणेशंतत्तद्ग्रहंचसंपूज्यमंत्रंजपेत् ॥ अथमंत्राः ॥ आकृष्णेनेतिहिरण्यस्तूपःसूर्यस्त्रिष्टुप् । सूर्यप्रीत्यर्थेजपेवि० ॥ ॐ भूर्भुवःस्वः । ॐ आकृष्णेन० ॥ इमन्देवावरुणःसोमोयजुः । सोमप्रीत्यर्थेजपेवि० ॥ ॐ भूर्भुवःस्वः । ॐ इमन्देवाऽअसपत्नꣳसुवध्वम्महतेक्षत्रायमहतेज्यैष्ठ्यायमहतेजानराज्यायेन्द्रस्येन्द्रियाय । इमममुष्यपुत्रममुष्यैपुत्रमस्यैविशऽएषवोमीराजासोमोस्माकम्ब्राह्मणानाꣳराजा ॥ अग्निमूर्धाविरूपांगिरसोग्निर्गायत्री । भौमप्रीत्यर्थेजपेवि० ॥ ॐ भूर्भुवःस्वः । ॐ अग्निर्मूर्धादिवःककुत्पतिःपृथिव्याऽअयम् । अपाꣳरेताꣳसिजिन्वति ॥ उद्बुध्यस्वपरमेष्ठीबुधस्त्रिष्टुप् । बुधप्रीत्यर्थेजपेवि० ॥ ॐ भूर्भुवःस्वः ।

ॐ उद्बुध्यस्वाग्नेप्रतिंजागृहित्वमिंष्टापूर्त्तेसःसृजेथामयञ्च । अस्मिन्त्सधस्थेऽअध्युत्तरस्मिन्विश्वेदे
वायजमानश्चसीदत ॥ बृहस्पतेगृत्समदोबृहस्पतिस्त्रिष्टुप् । बृहस्पतिप्रीत्यर्थेजपेवि० ॥ ॐ भू
र्भुवःस्वः । ॐ बृहस्पतेऽअतियदर्योऽअर्हाद्युमद्विभातिक्रतुमज्जनेषु । यद्दीदयच्छवसऽऋतप्रजा
ततदस्मासुद्रविणन्धेहिचित्रम् ॥ अन्नात्परिस्रुतप्रजापतिरश्विसरस्वतींद्राजगती । शुक्रप्रीत्यर्थेज
पेवि०॥ॐ भूर्भुवःस्वः । ॐ अन्नात्परिस्रुतोरसम्ब्रह्मणाव्यपिबत्क्षत्रम्पयःसोमंप्रजापतिः । ऋतेन
सत्यमिंद्रियंविपानंशुक्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॥ शन्नोदेवीदध्यङाथर्वण
आपोगायत्री । शनिश्चरप्रीत्यर्थेजपेवि० ॥ ॐ भूर्भुवःस्वः । ॐ शन्नोदेवी० ॥ कयानोवामदेवोराहु
र्गायत्री । राहुप्रीत्यर्थेजपेवि० ॥ ॐ भूर्भुवःस्वः । ॐ कयानश्चित्र० ॥ केतुङ्कृण्वन्मधुच्छंदाःकेतु
र्गायत्री । केतुप्रीत्यर्थेजपेवि० ॥ ॐ भूर्भुवःस्वः । ॐ केतुङ्कृण्वन्नकेतवेपेशोमर्याऽअपेशसे । समुष

द्भिरजायथाः ॥ ९ ॥ एतेषांयथायोग्यंमंत्रंजपेत् ॥ गुह्यातिगुह्यगोप्तेतिजपंनिवेदयेत् । अनेना
मुकग्रहमंत्रजपाख्येनकर्मणामुकग्रहस्वरूपीपरमेश्वरःप्रीयतांनमम ॥ तत्सद्ब्रह्मार्पणमस्तु ॥ इति
नवग्रहमंत्राः ॥ ॥ २८ ॥ अथसप्तश्लोकीगीता ॥ श्रीगणेशायनमः ॥ ओमित्येकाक्षरंब्रह्म
व्याहरन्मामनुस्मरन् । यःप्रयातित्यजन्देहंसयातिपरमांगतिं ॥ १ ॥ स्थानेहृषीकेशतवप्रकीर्त्या
जगत्प्रहृष्यत्यनुरज्यतेच । रक्षांसिभीतानिदिशोद्रवंतिसर्वेनमस्यंतिचसिद्धसंघाः ॥ २ ॥ सर्व
तःपाणिपादंतत्सर्वतोक्षिशिरोमुखं । सर्वतःश्रुतिमल्लोकेसर्वमावृत्यतिष्ठति ॥ ३ ॥ कविंपुराणमनु
शासितारमणोरणीयांसमनुस्मरेद्यः । सर्वस्यधातारमचिंत्यरूपमादित्यवर्णंतमसःपरस्तात्॥४॥
ऊर्ध्वमूलमधःशाखमश्वत्थंप्राहुरव्ययं । छंदांसियस्यपर्णानियस्तंवेदसवेदवित् ॥ ५ ॥ सर्वस्य
चाहंहृदिसन्निविष्टोमत्तःस्मृतिर्ज्ञानमपोहनंच । वेदैश्चसर्वैरहमेववेद्योवेदांतकृद्वेदविदेवचाहं ॥

॥ ६ ॥ मन्मनाभवमद्भक्तोमद्याजीमांनमस्कुरु । मामेवैष्यसियुक्त्वैवमात्मानंमत्परायणः ॥७॥
इतिश्रीमद्भगवद्गीतासुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवादेसप्तश्लोकीगीता ॥ ॥
॥ २९ ॥ अथेशावास्योपनिषत् ॥ श्रीगणेशायनमः ॥ ॐ ईशावास्यमिदꣳसर्वंयत्किंचजगं
त्याञ्जगत् । तेनत्यक्तेनभुञ्जीथामागृधःकस्यस्विद्धनम् ॥ १ ॥ कुर्वन्नेवेहकर्माणिजिजीविषेच्छतꣳ
समाः । एवन्त्वयिनान्यथेतोस्तिनकर्मलिप्यतेनरे ॥ २ ॥ असुर्यानामतेलोकाऽअन्धेनतमसा
वृताः । ताँस्तेप्रेत्यापिगच्छन्तियेकेचात्महनोजनाः ॥ ३ ॥ अनेजदेकम्मनसोजवीयोनैनं
देवाऽआप्नुवन्पूर्वमर्शत् । तद्धावतोन्यानत्येतितिष्ठत्तस्मिन्नपोमातरिश्वादधाति ॥ ४ ॥ तदेज
तितन्नैजतितद्दूरेतद्वन्तिके । तदन्तरस्यसर्वस्यतदुसर्वस्यास्यबाह्यतः ॥ ५ ॥ यस्तुसर्वाणिभू
तान्यात्मन्नेवानुपश्यति । सर्वभूतेषुचात्मानंततोनविचिकित्सति ॥ ६ ॥ यस्मिन्सर्वाणिभूता

न्यात्मैवाभूद्विजानतः । तत्रकोमोहःकःशोकऽएकत्वमनुपश्यतः ॥ ७ ॥ सपर्यगाच्छुक्रमकायम
व्रणमस्नाविरꣳशुद्धमपापविद्धम् । कविर्मनीषीपरिभूःस्वयम्भूर्याथातथ्यतोर्थान्व्यदधाच्छाश्वती
भ्यःसमाभ्यः ॥ ८ ॥ अन्धतमःप्रविशन्तियेसम्भूतिमुपासते । ततोभूयऽइवतेतमोयऽउसम्भू
त्याꣳरताः ॥ ९ ॥ अन्यदेवाहुःसम्भवादन्यदाहुरसम्भवात् । इतिशुश्रुमधीराणांयेनस्तद्विच
चक्षिरे ॥ १० ॥ सम्भूतिञ्चविनाशञ्चयस्तद्वेदोभयꣳसह । विनाशेनमृत्युन्तीर्त्वासम्भूत्यामृत
मश्नुते ॥ ११ ॥ अन्धतमःप्रविशन्तियेविद्यामुपासते । ततोभूयऽइवतेतमोयऽउविद्यायाꣳर
ताः ॥ १२ ॥ अन्यदेवाहुर्विद्यायाऽअन्यदाहुरविद्यायाः । इतिशुश्रुमधीराणांयेनस्तद्विचचक्षि
रे ॥ १३ ॥ विद्याञ्चाविद्याञ्चयस्तद्वेदोभयꣳसह । अविद्ययामृत्युन्तीर्त्वाविद्ययामृतमश्नुते ॥
॥ १४ ॥ वायुरनिलममृतमथेदम्भस्मान्तꣳशरीरम् । ॐ ३म् । क्रतोस्मर । क्लिबेस्मर । कृतꣳ

य०ब्रा० स्मंर ॥ १५ ॥ अग्नेनयंसुपथारायेऽअस्मान्विश्वानिदेववयुनानिविद्वान् । युयोध्यस्मज्जुंहुराण क.मं.
॥७३॥ मेनोभूयिंष्ठान्तेनमंऽउक्तिंविधेम ॥ १६ ॥ हिरण्मयेंनपात्रेणसत्यस्यापिंहितम्मुखम् । योसावा
दित्येपुरुंषस्सोसावहम् ॥ १७ ॥ ॐ ३म् । ॐ खम्ब्रह्म ॥ इतीशावास्योपनिषत्॥ ॥३०॥
अथशुक्लयजुःशाखोत्पत्तिः ॥ श्रीगणेशायनमः ॥ यस्याःशुक्लयजुर्वेदमाध्यंदिनवाजसनेयशा
खायाअध्येतारःशुक्लयजुःसंज्ञकास्तस्याःप्रवक्तापरमपदभाग्योगीश्वरोयाज्ञवल्क्यआसीत् । सपु
ण्यकीर्तिर्योगीश्वरोयशोधवलीकृतत्रैलोक्योमिथिलायामवसत् । तस्यजनिस्त्रेतायांवाजसनेय
नाम्नोमहर्षेरासीत् । तस्यद्वेभार्येबभूवतुः । मैत्रेयीकात्यायनीच । तयोर्मैत्रेय्यनपत्यायाज्ञल्क्या
ज्ज्ञानोपदेशंलब्ध्वागार्हस्थ्यमनुभूयांतेकैवल्यपदमगमत् । कात्यायनीचंद्रकांतमहामेघविजयना ॥७३॥
म्नस्त्रीन्पुत्रान्प्रासूत । याज्ञवल्क्योवैशंपायनर्षेर्भागिनेयः । तंचवैशंपायनोयजुःशाखामध्यापया

मास । ताचकारणवशाद्याज्ञवल्क्यउत्सृष्टवान् । तद्यथा । एकदासर्वैर्ऋषिभिरैकमत्यार्थंमेरुपर्व
तएकत्रगंतव्यमितिकारणान्तरेनिश्चितं । यदिकश्चिन्नगच्छेत्तर्हिंसप्तरात्रंवाचिकब्रह्महत्यापातकेन
लिप्तोभवेदितिनियमःकृतः । तदनुसारेणसर्वेप्यृषयोमिलिताः । वैशंपायनस्यतुतद्दिनेपितुःश्रा
द्धतिथिः । अतोनित्यकर्मसमाप्यश्राद्धंकृत्वासमाजेगंतव्यमितिनिश्चित्यप्रत्यूषउत्थायरात्रावे
वस्नानार्थंप्रस्थितः । तदांधकारत्वेनगृहकोणेनिद्राणस्यबालस्योपरितत्पादःपतितोबालश्चपंच
त्वमगमत् । तच्छोकव्याकुलस्यवैशंपायनस्यतद्दिनेसभागमनावकाशोनजातः । अपिचबाल
हत्याजाता । तेनतस्यवाचिकब्रह्महत्याबालहत्यापातकेप्राप्ते । तन्निरसनार्थंशिष्यानाहूयप्राय
श्चित्तार्थंन्ययुङ्क्त । नियुक्ताश्चतओमित्यूचुः । तेष्वाचारसंपन्नोमेधावीवरीयान्याज्ञवल्क्योहेभग
न्सर्वेतेबालाःप्रायश्चित्तंकर्तुमसमर्थाअतोहमेकएवपातकद्वयनिवृत्तयउद्युक्तोभवामि । भवद्भिर्नि

श्चिततयास्थातव्यमितिगुरुमुवाच । तस्यैतत्सप्रश्रयमपिवाक्यमितरापमानकारीतिमत्वोतचजन
कदत्तस्यगोसहस्त्रस्यसर्वंष्यवज्ञापूर्वककृतप्रतिग्रहेणतद्विषयस्वाज्ञोल्लंघनेनपरमक्रुद्धोवैशंपायनो
गुरूरेविप्रावमंतागर्विष्ठस्त्वमसि । अतोमदधीतांयजुःशाखांमह्यंप्रतर्प्यत्वयायथेष्टंगंतव्यमितित
च्छिक्षार्थंयाज्ञवल्क्यमवदत् । एवंकुपितस्यगुरोर्वाक्यंश्रुत्वायाज्ञवल्क्योप्यभीतोगुरोरधीतांयजुः
शाखांतत्त्याज । तांचवमितान्नरूपांशाखांवेदलुब्धाब्राह्मणास्तित्तिरिणोभूत्वाभक्षितवंतः । तदध्ये
तारस्तेकृष्णयजुःसं ज्ञकाइतिप्रसिद्धाः । पश्चाद्वेदरहितोदुःखितोयाज्ञवल्क्योमानुषंगुरुंनैवकरो
मीतिनिश्चित्यभगवंतमादित्यमाराध्यप्रसन्नात्तस्मान्मनुष्यैरज्ञातांप्रत्यग्रांअयातयामांशुक्लयजुः
शाखांमाध्यंदिनवाजसनेयनाम्नीमध्यगात् । शिष्यपरंपरयातदध्येतारःशुक्लयजुःसंज्ञकाइतिप्रसि
द्धाः ॥ **इतिशुक्लयजुःशाखोत्पत्तिः** ॥ शकेनेत्रपृथ्वीगजेंदौप्लवेचनभःकृष्णपृथ्वीतिथौशुक्रवारे ।

मयारब्धमेतत्समाप्तिंचनीतंदशम्यांगुरौशुक्लपक्षेइषस्य ॥ १ ॥ यदस्मिन्भ्रमान्न्यूनमाधिक्ययु
क्तंसमीकृत्यग्राह्यंसदाविप्रवर्यैः । सदाचारयुक्तैरितिप्रार्थयामिद्विजोजोश्युपाव्होजयेशाभिधानः ॥
॥ २ ॥ अनेनप्रीयतांदेवोभगवाञ्छंभुरव्ययः ॥ कर्माण्याचरतांपुंसांभुक्तिंमुक्तिंचयच्छतु ॥
॥ ३ ॥ इति श्रीशुक्लयजुर्वेदीयब्रह्मनित्यकर्मसमाप्तं ॥

॥ समाप्तोऽयंग्रन्थः ॥

इदंपुस्तकं

वसुन्धराङ्ग्लगुर्जरशालायामुख्याध्यक्षेणजोश्युपाव्हप्रेमानंदात्मजेनजयशंकरशर्मणासंशोध्य,

मुंबापुर्यां

(जगदीश्वर) यंत्रालयेमुद्रयित्वाप्रकटीकृतं.

शाके १८१२ पौषेशु० १५ संवत् १९४७.

मूल्यमेकोरूपकः

अथ श्रीशुक्लयजुर्वेदीय ब्रह्म (नित्य) कर्म